एधतां १ एधेतां २ एधंतां ३ प्र० ॥ एधस्व १ एधेथां २ एधध्वं ३ म० ॥ एधै १ एधा
वहै २ एधामहै ३ उ० ॥ लङ् ॥ ऐधत १ ऐधेतां २ ऐधंत ३ प्र० ॥ ऐधथाः १ ऐधेथां २
ऐधध्वं ३ म० ॥ ऐधे १ ऐधावहि २ ऐधामहि ३ उ० ॥ विधिलिङ् ॥ एधेत १ एधेया
तां २ एधेरन् ३ प्र० ॥ एधेथाः १ एधेयाथां २ एधेध्वं ३ म० ॥ एधेय १ एधेवहि २
एधेमहि ३ उ० ॥ आशीर्लिङ् ॥ एधिषीष्ट १ एधिषीयास्तां २ एधिषीरन् ३ प्र० ॥ एधि
षीष्ठाः १ एधिषीयास्थां २ एधिषीध्वं ३ म० ॥ एधिषीय १ एधिषीवहि २ एधि
षीमहि ३ उ० ॥ लुङ् ॥ ऐधिष्ट १ ऐधिषातां २ ऐधिषत ३ प्र० ॥ ऐधिष्ठाः १ ऐधि
षाथां २ ऐधिढ्वं ३ म० ॥ ऐधिषि १ ऐधिष्वहि २ ऐधिष्महि ३ उ० ॥ ऌङ् ॥ ऐधिष्य
त १ ऐधिष्येतां २ ऐधिष्यंत ३ प्र० ॥ ऐधिष्यथाः १ ऐधिष्येथां २ ऐधिष्यध्वं ३ म० ३४

ऐधिष्ये १ ऐधिष्यावहि २ ऐधिष्यामहि ३ उ० ॥ ॥ अथ लुग्विकरणः सकर्म
कः परस्मैपदवान् ज्ञानार्थको विद धातुः ॥ लट् ॥ वेद १ विदतुः २ विदुः ३ प्र० ॥
वेत्थ १ विदथुः २ विद ३ म० ॥ वेद १ विद्व २ विद्म ३ उ० ॥ — वेत्ति १ वित्तः २ विदंति ३
प्र० ॥ वेत्सि १ वित्थः २ वित्थ ३ म० ॥ वेद्मि १ विद्वः २ विद्मः ३ उ० ॥ लिट् ॥ विवेद १
विविदतुः २ विविदुः ३ प्र० ॥ विवेदिथ १ विविदथुः २ विविद ३ म० ॥ विवेद १ वि
विदिव २ विविदिम ३ उत्त० ॥ — विदांचकारेत्यादि विदांबभूवेत्यादि विदामा
सेत्यादिश्च पूर्ववत् ॥ लुट् ॥ वेदिता १ वेदितारौ २ वेदितारः ३ प्र० ॥ वेदितासि १
वेदितास्थः २ वेदितास्थ ३ म० ॥ वेदितास्मि १ वेदितास्वः २ वेदितास्मः ३ उ० ॥
ऌट् ॥ वेदिष्यति १ वेदिष्यतः २ वेदिष्यंति ३ प्र० ॥ वेदिष्यसि १ वेदिष्यथः २
वेदिष्यथ ३ म० ॥ वेदिष्यामि १ वेदिष्यावः २ वेदिष्यामः ३ उ० ॥ लोट् ॥ विदांक
रोतु १ विदांकुरुतात् १ विदांकुरुतां २ विदांकुर्वंतु ३ प्र० ॥ विदांकुरु १ विदांकु
रुतात् १ विदांकुरुतं २ विदांकुरुत ३ म० ॥ विदांकरवाणि १ विदांकरवाव २

 विदांकरवाम ३उ०॥ – वेत्तु १ वित्तात् १ वित्तां २ विदंतु ३प्र०॥ विद्धि १ वित्तात् १
 वित्तं २ वित्त ३म०॥ वेदानि १ वेदाव २ वेदाम ३उ०॥ लङ्॥ अवेत् १ अवित्तां २
अविदुः ३प्र०॥ अवेः १ अवेत् १ अवित्तं २ अवित्त ३ म०॥ अवेदं १ अविद्व २
अविद्म ३उ०॥ विधिलिङ्॥ विद्यात् १ विद्यातां २ विद्युः ३प्र०॥ विद्याः १ वि
द्यातं २ विद्यात ३म०॥ विद्यां १ विद्याव २ विद्याम ३उ०॥ आशीर्लिङ्॥ विद्या
त् १ विद्यास्तां २ विद्यासुः ३प्र०॥ विद्याः १ विद्यास्तं २ विद्यास्त ३म०॥ विद्या
सं १ विद्यास्व २ विद्यास्म ३उ०॥ लुङ्॥ अवेदीत् १ अवेदिष्टां २ अवेदिषुः
३प्र०॥ अवेदीः १ अवेदिष्टं २ अवेदिष्ट ३म०॥ अवेदिषं १ अवेदिष्व २ अवे
दिष्म ३उ०॥ लृङ्॥ अवेदिष्यत् १ अवेदिष्यतां २ अवेदिष्यन् ३प्र०॥ अ
वेदिष्यः १ अवेदिष्यतं २ अवेदिष्यत ३म०॥ अवेदिष्यं १ अवेदिष्याव २
अवेदिष्याम ३उ०॥ ॥ अथ लुग्विकरणः सकर्मक उभयपदवान् व्य
क्तवागर्थको ब्रूधातुः॥ तत्र परस्मैपदानि॥ लट्॥ आह १ आहतुः २ आहुः २

३ प्र०॥ आत्थ १ आहथुः २ ब्रूथ ३म०॥ ब्रवीमि १ ब्रूवः २ ब्रूमः ३उ०॥
– ब्रवीति १ ब्रूतः २ ब्रुवंति ३प्र०॥ ब्रवीषि १ ब्रूथः २ ब्रूथ ३म० ब्रवीमि
१ ब्रूवः २ ब्रूमः ३उ०॥ लिट्॥ उवाच १ ऊचतुः २ ऊचुः ३प्र०॥ उवचि
थ १ उवक्थ १ ऊचथुः २ ऊच ३म०॥ उवाच १ उवच १ ऊचिव २ ऊ
चिम ३उ०॥ लुट्॥ वक्ता १ वक्तारौ २ वक्तारः ३प्र०॥ वक्तासि १ वक्ता
स्थः २ वक्तास्थ ३म०॥ वक्तास्मि १ वक्तास्वः २ वक्तास्मः ३उ०॥ लृट्॥
वक्ष्यति १ वक्ष्यतः २ वक्ष्यंति ३प्र०॥ वक्ष्यसि १ वक्ष्यथः २ वक्ष्यथ ३म०
॥ वक्ष्यामि १ वक्ष्यावः २ वक्ष्यामः ३उ०॥ लोट्॥ ब्रवीतु १ ब्रूतात् १ ब्रू
तां २ ब्रुवंतु ३प्र०॥ ब्रूहि १ ब्रूतात् १ ब्रूतं २ ब्रूत ३म०॥ ब्रवाणि १ ब्रवा
व २ ब्रवाम ३उ०॥ लङ्॥ अब्रवीत् १ अब्रूतां २ अब्रुवन् ३प्र०॥ अ
ब्रवीः १ अब्रूतं २ अब्रूत ३म०॥ अब्रवं १ अब्रूव २ अब्रूम ३उ०॥ विधि
लिङ्॥ ब्रूयात् १ ब्रूयातां २ ब्रूयुः ३प्र०॥ ब्रूयाः १ ब्रूयातं २ ब्रूयात ३

धा॰रू॰म॰॥ब्रूयां १ ब्रूयाव २ ब्रूयाम ३ उ॰॥आशीर्लिङ्॥उच्यात् १ उच्यास्तां
८ २ उच्यासुः ३ प्र॰॥उच्याः १ उच्यास्तं २ उच्यास्त ३ म॰॥उच्यासं १ उच्यास्व २
उच्यास्म ३ उ॰॥लुङ्॥अवोचत् १ अवोचतां २ अवोचन् ३ प्र॰॥अवोचः १ अ
वोचतं २ अवोचत ३ म॰॥अवोचं १ अवोचाव २ अवोचाम ३ उ॰॥लृङ्॥अव
क्ष्यत् १ अवक्ष्यतां २ अवक्ष्यन् ३ प्र॰॥अवक्ष्यः १ अवक्ष्यतं २ अवक्ष्यत ३ म॰
अवक्ष्यं १ अवक्ष्याव २ अवक्ष्याम ३ उ॰॥अथात्मनेपदानि॥लट्॥ब्रूते १ ब्रुवा
ते २ ब्रुवते ३ प्र॰॥ब्रूषे १ ब्रुवाथे २ ब्रूध्वे ३ म॰॥ब्रुवे १ ब्रूवहे २ ब्रूमहे ३ उ॰॥लिट्॥
ऊचे १ ऊचाते २ ऊचिरे ३ प्र॰॥ऊचिषे १ ऊचाथे २ ऊचिध्वे ३ म॰॥ऊचे १ ऊ
चिवहे २ ऊचिमहे ३ उ॰॥लिट्॥वक्ता १ वक्तारौ २ वक्तारः ३ प्र॰॥वक्तासे १
वक्तासाथे २ वक्ताध्वे ३ म॰॥वक्ताहे १ वक्तास्वहे २ वक्तास्महे ३ उ॰॥लृट्॥
वक्ष्यते १ वक्ष्येते २ वक्ष्यंते ३ प्र॰॥वक्ष्यसे १ वक्ष्येथे २ वक्ष्यध्वे ३ म॰॥वक्ष्ये १
वक्ष्यावहे २ वक्ष्यामहे ३ उ॰॥लोट्॥ब्रूतां १ ब्रुवातां २ ब्रुवतां ३॥प्र॰॥ब्रूष्व १ ३६

ब्रुवाथां २ ब्रूध्वं ३ म॰॥ब्रवै १ ब्रवावहै २ ब्रवामहै ३ उ॰॥लङ्॥अब्रूत १ अब्रु
वातां २ अब्रुवत ३ प्र॰॥अब्रूथाः १ अब्रुवाथां २ अब्रूध्वं ३ म॰॥अब्रुवि १ अब्रू
वहि २ अब्रूमहि ३ उ॰॥विधिलिङ्॥ब्रुवीत १ ब्रुवीयातां २ ब्रुवीरन् ३ प्र॰॥ब्रु
वीथाः १ ब्रुवीयाथां २ ब्रुवीध्वं ३ म॰॥ब्रुवीय १ ब्रुवीवहि २ ब्रुवीमहि ३ उ॰॥
आशीर्लिङ्॥वक्षीष्ट १ वक्षीयास्तां २ वक्षीरन् ३ प्र॰॥वक्षीष्ठाः १ वक्षीया
स्थां २ वक्षीध्वं ३ म॰॥वक्षीय १ वक्षीवहि २ वक्षीमहि ३ उ॰॥लुङ्॥अवो
चत १ अवोचेतां २ अवोचंत ३ प्र॰॥अवोचथाः १ अवोचेथां २ अवोचध्वं ३
म॰॥अवोचे १ अवोचावहि २ अवोचामहि ३॥लृङ्॥अवक्ष्यत १ अवक्ष्ये
तां २ अवक्ष्यंत ३ प्र॰॥अवक्ष्यथाः १ अवक्ष्येथां २ अवक्ष्यध्वं ३ म॰॥अव
क्ष्ये १ अवक्ष्यावहि २ अवक्ष्यामहि ३ उ॰॥ ॥अथसत्तार्थकोऽकर्मकोलु
ग्विकरणः कर्तरिपरस्मैपदवानस्धातुः॥लट्॥अस्ति १ स्तः २ संति ३ प्र॰॥अ
सि १ स्थः २ स्थ ३ म॰॥अस्मि १ स्वः २ स्मः ३ उ॰॥लिट्-लुट्-लृटां बभूवेत्यादी

निभूवद्रूपाणि ॥लोट् ॥अस्तु१ स्तात्१ स्तां२ संतु३ प्र॰॥एधि१ स्तात्१ स्तं२ स्त३म॰॥असानि१ असाव२ असाम३उ॰॥लङ्॰॥आसीत्१ आस्तां२ आसन्३प्र॰॥आसीः१ आस्तं२ आस्त३म॰॥आसं१ आस्व२ आस्म३उ॰॥विधिलिङ्॰॥स्यात्१ स्यातां२ स्युः३प्र॰॥स्याः१ स्यातं२ स्यात३म॰॥स्यां१ स्याव२ स्याम३उ॰॥आशीर्लिङ्॰ लुङ्॰ लृङ् भूयादित्यादीनि भूवद्रूपाणि॥ ॥

अथ धारणपोषणार्थकः श्लुविकरणः सकर्मक उभयपदवान् भृञ् धातुः ॥तत्र परस्मैपदानि॥लट् ॥बिभर्ति१ बिभृतः२ बिभ्रति३प्र॰॥बिभर्षि१ बिभृथः२ बिभृथ३म॰॥बिभर्मि१ बिभृवः२ बिभृमः३उ॰॥लिट् ॥बभार१ बभ्रतुः२ बभ्रुः३प्र॰॥बभर्थ१ बभ्रथुः२ बभ्र३म॰॥बभार१ बभर१ बभृव२ बभृम३उ॰॥ बिभरांचकारेत्यादि बिभरांबभूवेत्यादि बिभरामासेत्यादि च पूर्ववत्॥लुट् ॥भर्ता१ भर्तारौ२ भर्तारः३प्र॰॥भर्तासि१ भर्तास्थः२ भर्तास्थ३म॰॥भर्तास्मि१ भर्तास्वः२ भर्तास्मः३उ॰॥लृट् ॥ ३

भरिष्यति१ भरिष्यतः२ भरिष्यंति३प्र॰॥भरिष्यसि१ भरिष्यथः२ भरिष्यथ३म॰॥भरिष्यामि१ भरिष्यावः२ भरिष्यामः३उ॰॥लोट् ॥बिभर्तु१ बिभृतात्१ बिभृतां२ बिभ्रतु३प्र॰॥बिभृहि१ बिभृतात्१ बिभृतं२ बिभृत३म॰॥बिभराणि१ बिभराव२ बिभराम३उ॰॥लङ्॰॥अबिभः१ अबिभृतां२ अबिभरुः३प्र॰॥अबिभः१ अबिभृतं२ अबिभृत३म॰॥अबिभरं१ अबिभृव२ अबिभृम३॥विधिलिङ्॰॥बिभृयात्१ बिभृयातां२ बिभृयुः३प्र॰॥बिभृयाः१ बिभृयातं२ बिभृयात३म॰॥बिभृयां१ बिभृयाव२ बिभृयाम३उ॰॥आशीर्लिङ्॰॥भ्रियात्१ भ्रियास्तां२ भ्रियासुः३प्र॰॥भ्रियाः१ भ्रियास्तं२ भ्रियास्त३म॰॥भ्रियासं१ भ्रियास्व२ भ्रियास्म३उ॰॥लुङ्॰॥अभार्षीत्१ अभार्ष्टां२ अभार्षुः३प्र॰॥अभार्षीः१ अभार्ष्टं२ अभार्ष्ट३म॰॥अभार्षं१ अभार्ष्व२ अभार्ष्म३उ॰॥लृङ्॰॥अभरिष्यत्१ अभरिष्यतां२ अभरिष्यन्३प्र॰॥अभरिष्यः१ अभरिष्यतं२ अभरिष्यत३म॰॥अभरिष्यं१

धा०रू० अभरिष्याव २ अभरिष्याम ३ उ०॥ ॥अथात्मनेपदानि॥लट्॥विभृते १
१० विभ्राते २ विभ्रते ३ प्र०॥विभृषे १ विभ्राथे २ विभृध्वे ३ म०॥विभ्रे १ विभृव
हे २ विभृमहे ३ उ०॥लिट्॥बभ्रे १ बभ्राते २ बभ्रिरे ३ प्र०॥बभृषे १ बभ्राथे २ ब
भृढ्वे ३ म०॥बभ्रे १ बभृवहे २ बभृमहे ३ उ०॥ — बिभरांचक्रे १ इत्यादि बिभ
रांबभूवेत्यादि बिभरामासेत्यादिच पूर्ववत्॥लुट्॥भर्ता १ भर्तारौ २ भर्तारः ३
प्र०॥भर्तासे १ भर्तासाथे २ भर्ताध्वे ३ म०॥भर्ताहे १ भर्तास्वहे २ भर्तास्महे ३
उ०॥लृट्॥भरिष्यते १ भरिष्येते २ भरिष्यंते ३ प्र०॥भरिष्यसे १ भरिष्ये
थे २ भरिष्यध्वे ३ म०॥भरिष्ये १ भरिष्यावहे २ भरिष्यामहे ३ उ०॥लोट्॥बि
भृतां १ बिभ्रातां २ बिभ्रतां ३ प्र०॥बिभृष्व १ बिभ्राथां २ बिभृध्वं ३ म०॥बि
भरै १ बिभरावहै २ बिभरामहै ३ उ०॥लङ्॥अबिभृत १ अबिभ्रातां २ अ
बिभ्रत ३ प्र०॥अबिभृथाः १ अबिभ्राथां २ अबिभृध्वं ३ म०॥अबिभ्रि १
अबिभृवहि २ अबिभृमहि ३ उ०॥विधिलिङ्॥बिभ्रीत १ बिभ्रीयातां २ बि 3
भ्रीरन् ३ प्र०॥बिभ्रीथाः १ बिभ्रीयाथां २ बिभ्रीध्वं ३ म०॥बिभ्रीय १ बिभ्री
वहि २ बिभ्रीमहि ३ उ०॥आशीर्लिङ्॥भृषीष्ट १ भृषीयास्तां २ भृषीरन् ३ प्र०॥
भृषीष्ठाः १ भृषीयास्थां २ भृषीढ्वं ३ म०॥भृषीय १ भृषीवहि २ भृषीमहि ३ उ०॥
लुङ्॥अभृत १ अभृषातां २ अभृषत ३ प्र०॥अभृथाः १ अभृषाथां २
अभृढ्वं ३ म०॥अभृषि १ अभृष्वहि २ अभृष्महि ३ उ०॥लृङ्॥अभरि
ष्यत १ अभरिष्येतां २ अभरिष्यंत ३ प्र०॥अभरिष्यथाः १ अभरिष्येथां २
अभरिष्यध्वं ३ म०॥अभरिष्ये १ अभरिष्यावहि २ अभरिष्यामहि ३ उ०
॥ ॥अथ प्राणिप्रसवार्थकः श्यन्विकरणः सकर्मक आत्मनेपदवान्
षूङ् धातुः॥लट्॥सूयते १ सूयेते २ सूयंते ३ सूयसे १ सूयेथे २ सूयध्वे
३ म०॥सूये १ सूयावहे २ सूयामहे ३ उ०॥लिट्॥सुषुवे १ सुषुवाते २
सुषुविरे ३ प्र०॥सुषुविषे १ सुषुवाथे २ सुषुविध्वे ३ सुषुविढ्वे ३ म०॥
सुषुवे १ सुषुविवहे २ सुषुविमहे ३ उ०॥लुट्॥सोता १ सविता १ सोता

धा॰रू॰ रौ २ सवितारौ २ सोतारः ३ सवितारः ३ प्र॰॥ सोतासे १ सवितासे १ सो
११ तासाथे २ सवितासाथे २ सोताध्वे ३ सविताध्वे ३ म॰॥ सोताहे १ सविताहे १
सोतास्वहे २ सवितास्वहे २ सोतास्महे ३ सवितास्महे ३॥ ऌट्॥ सविष्यते १
सोष्यते १ सविष्येते २ सोष्येते २ सविष्यंते ३ सोष्यंते ३ प्र॰॥ सविष्यसे १
सोष्यसे १ सविष्येथे २ सोष्येथे २ सविष्यध्वे ३ सोष्यध्वे ३ म॰॥ सविष्ये १
सोष्ये २ सविष्यावहे २ सोष्यावहे २ सविष्यामहे ३ सोष्यामहे ३ उ॰॥ लोट्॥
सूयतां १ सूयेतां २ सूयंतां ३ प्र॰॥ सूयस्व १ सूयेथां २ सूयध्वं ३ म॰॥ सूयै १
सूयावहै २ सूयामहै ३ उ॰॥ लङ्॥ असूयत १ असूयेतां २ असूयंत ३
प्र॰॥ असूयथाः १ असूयेथां २ असूयध्वं ३ म॰॥ असूये १ असूयावहि २
असूयामहि ३ उ॰॥ विधिलिङ्॥ सूयेत १ सूयेयातां २ सूयेरन् ३ प्र॰॥
सूयेथाः १ सूयेयाथां २ सूयेध्वं ३ म॰॥ सूयेय १ सूयेवहि २ सूयेमहि ३ उ॰
आशीर्लिङ्॥ सविषीष्ट १ सोषीष्ट १ सविषीयास्तां २ सोषीयास्तां २ स ३

विषीरन् ३ सोषीरन् ३ प्र॰॥ सविषीष्ठाः १ सोषीष्ठाः १ सविषीयास्थां २ सो
षीयास्थां २ सविषीध्वं ३ सविषीढ्वं ३ सोषीढ्वं ३ मध्यमः ॥ सविषीय १ सो
षीय १ सविषीवहि २ सोषीवहि २ सोषीमहि ३ सविषीमहि ३ उ॰॥ लुङ्॥ अ
सविष्ट १ असोष्ट १ असविषातां २ असोषातां २ असविषत ३ असोषत ३
प्र॰॥ असविष्ठाः १ असोष्ठाः १ असविषाथां २ असोषाथां २ असविध्वं ३
असविढ्वं ३ असोढ्वं ३ म॰॥ असविषि १ असोषि १ असविष्वहि २ असो
ष्वहि २ असविष्महि ३ असोष्महि ३ उ॰॥ ऌङ्॥ असविष्यत १ असोष्य
त १ असविष्येतां २ असोष्येतां २ असविष्यंत ३ असोष्यंत ३ प्र॰॥ अस
विष्यथाः १ असोष्यथाः १ असविष्येथां २ असोष्येथां २ असविष्यध्वं ३
असोष्यध्वं ३ म॰॥ असविष्ये १ असोष्ये १ असविष्यावहि २ असो
ष्यावहि २ असविष्यामहि ३ असोष्यामहि ३ उ॰॥ ॥ अथ शक्त्य
र्थकः श्नुविकरणोऽकर्मकः कर्तरिपरस्मैपदवान् शक्ऌ धातुः॥ लट्॥ श

क्नोति १ शक्नुतः २ शक्नुवंति ३ प्र०॥ शक्नोषि १ शक्नुथः २ शक्नुथ ३ म०॥
शक्नोमि १ शक्नुवः २ शक्नुमः ३ उ०॥ लिट्॥ शशाक १ शेकतुः २ शेकुः ३
प्र०॥ शेकिथ १ शशाक्थ १ शेकथुः २ शेक ३ म०॥ शशाक १ शशक १
शेकिव २ शेकिम ३ उ०॥ लुट्॥ शक्ता १ शक्तारौ २ शक्तारः ३ प्रथमः
॥ शक्तासि १ शक्तास्थः २ शक्तास्थ ३ मध्यमः॥ शक्तास्मि १ शक्ता
स्वः २ शक्तास्मः ३ उ०॥ लृट्॥ शक्ष्यति १ शक्ष्यतः २ शक्ष्यंति ३ प्र०॥
शक्ष्यसि १ शक्ष्यथः २ शक्ष्यथ ३ म०॥ शक्ष्यामि १ शक्ष्यावः २ शक्ष्यामः
३ उ०॥ लोट्॥ शक्नोतु १ शक्नुतात् १ शक्नुतां २ शक्नुवंतु ३ प्र०॥ शक्नुहि १
शक्नुतात् १ शक्नुतं २ शक्नुत ३ म०॥ शक्नवानि १ शक्नवाव २ शक्नवाम
३ उ०॥ लङ्॥ अशक्नोत् १ अशक्नुतां २ अशक्नुवन् ३ प्र०॥ अशक्नोः १
अशक्नुतं २ अशक्नुत ३ म०॥ अशक्नवं १ अशक्नुव २ अशक्नुम ३ उ०॥
विधिलिङ्॥ शक्नुयात् १ शक्नुयातां २ शक्नुयुः ३ प्र०॥ शक्नुयाः १ श ४

क्नुयातं २ शक्नुयात ३ म०॥ शक्नुयां १ शक्नुयाव २ शक्नुयाम ३ उ०॥ आ
शीर्लिङ्॥ शक्यात् १ शक्यास्तां २ शक्यासुः ३ प्र०॥ शक्याः १ शक्यास्तं २
शक्यास्त ३ म०॥ शक्यासं १ शक्यास्व २ शक्यास्म ३ उ०॥ लुङ्॥ अशकत् १
अशकतां २ अशकन् ३ प्र०॥ अशकः १ अशकतं २ अशकत ३ म०॥ अ
शकं १ अशकाव २ अशकाम ३ उ०॥ लृङ्॥ अशक्ष्यत् १ अशक्ष्यतां २ अ
शक्ष्यन् ३ अशक्ष्यः १ अशक्ष्यतं २ अशक्ष्यत ३ म०॥ अशक्ष्यं १ अशक्ष्याव २
अशक्ष्याम ३ उ०॥ ॥अथ प्राणत्यागार्थकः शविकरणोऽकर्मको ल
ट् लोट् लङ् लिङ् लुङ् क्षु आत्मनेपदवान्॥ लिट् लुट् लृट् लृङ् क्षु च
परस्मैपदवान् मृङ् धातुः॥ लट्॥ म्रियते १ म्रियेते २ म्रियंते ३ प्र०॥ म्रि
यसे १ म्रियेथे २ म्रियध्वे ३ म०॥ म्रिये १ म्रियावहे २ म्रियामहे ३ उ०॥ लि
ट्॥ ममार १ मम्रतुः २ मम्रुः ३ प्र०॥ ममर्थ १ मम्रथुः २ मम्र ३ म०॥ ममा
र १ ममर १ मम्रिव २ मम्रिम ३ उ०॥ लुट्॥ मर्ता १ मर्तारौ २ मर्तारः ३ प्र०

मर्तासि १ मर्तास्थः २ मर्तास्थ ३ म० ॥ मर्तास्मि १ मर्तास्वः २ मर्तास्मः ३ उ० ॥
लृट् ॥ मरिष्यति १ मरिष्यतः २ मरिष्यंति ३ प्र० ॥ मरिष्यसि १ मरिष्यथः २
मरिष्यथ ३ म० ॥ मरिष्यामि १ मरिष्यावः २ मरिष्यामः ३ उ० ॥ लोट् ॥ म्रि
यतां १ म्रियेतां २ म्रियंतां ३ प्र० ॥ म्रियस्व १ म्रियेथां २ म्रियध्वं ३ म० ॥ म्रियै १
म्रियावहै २ म्रियामहै ३ उ० ॥ लङ् ॥ अम्रियत १ अम्रियेतां २ अम्रियंत ३
प्र० ॥ अम्रियथाः १ अम्रियेथां २ अम्रियध्वं ३ म० ॥ अम्रिये १ अम्रियावहि २
अम्रियामहि ३ उ० ॥ विधिलिङ् ॥ म्रियेत १ म्रियेयातां २ म्रियेरन् ३ प्र० ॥
म्रियेथाः १ म्रियेयाथां २ म्रियेध्वं ३ म० ॥ म्रियेय १ म्रियेवहि २ म्रियेमहि ३
उ० ॥ आशीर्लिङ् ॥ मृषीष्ट १ मृषीयास्तां २ मृषीरन् ३ प्र० ॥ मृषीष्ठाः १ मृ
षीयास्थां २ मृषीढ्वं ३ म० ॥ मृषीय १ मृषीवहि २ मृषीमहि ३ उ० ॥ लुङ् ॥ अ
मृत १ अमृषातां २ अमृषत ३ प्र० ॥ अमृथाः १ अमृषाथां २ अमृढ्वं ३ म०
अमृषि १ अमृष्वहि २ अमृष्महि ३ उ० ॥ लृङ् ॥ अमरिष्यत् १ अमरिष्यतां २

अमरिष्यन् ३ प्र० ॥ अमरिष्यः १ अमरिष्यतं २ अमरिष्यत ३ म० ॥ अमरि
ष्यं १ अमरिष्याव २ अमरिष्याम ३ उ० ॥ अथ श्नम् विकरणः सकर्मकः प
रस्मैपदवान् संचूर्णनार्थकः पिष्लृ धातुः ॥ लट् ॥ पिनष्टि १ पिंष्टः २ पिंषंति
३ प्र० ॥ पिनक्षि १ पिंष्ठः २ पिंष्ठ ३ म० ॥ पिनष्मि १ पिंष्वः २ पिंष्मः ३ उ० ॥
लिट् ॥ पिपेष १ पिपिषतुः २ पिपिषुः ३ प्र० ॥ पिपेषिथ १ पिपिषथुः २ पि
पिष ३ म० ॥ पिपेष १ पिपिषिव २ पिपिषिम ३ उ० ॥ लुट् ॥ पेष्टा १ पेष्टारौ
२ पेष्टारः ३ प्र० ॥ पेष्टासि १ पेष्टास्थः २ पेष्टास्थ ३ म० ॥ पेष्टास्मि १ पेष्टास्वः २
पेष्टास्मः ३ उ० ॥ लृट् ॥ पेक्ष्यति १ पेक्ष्यतः २ पेक्ष्यंति ३ प्र० ॥ पेक्ष्यसि १
पेक्ष्यथः २ पेक्ष्यथ ३ म० ॥ पेक्ष्यामि १ पेक्ष्यावः २ पेक्ष्यामः ३ उ० ॥ लोट् ॥
पिनष्टु १ पिंष्टात् १ पिंष्टां २ पिंषंतु ३ प्र० ॥ पिण्ढि १ पिंष्टात् १ पिंष्टं २ पिंष्ट ३
म० ॥ पिनषाणि १ पिनषाव २ पिनषाम ३ उ० ॥ लङ् ॥ अपिनट् १ अपिं
ष्टां २ अपिंषन् ३ प्र० ॥ अपिनट् १ अपिंष्टं २ अपिंष्ट ३ म० ॥ अपिनषं १

अपिंष्व २ अपिंष्म ३ उ॰॥ विधिलिङ्॥ पिंष्यात् १ पिंष्यातां २ पिंष्युः ३
प्र॰॥ पिंष्याः १ पिंष्यातं २ पिंष्यात ३ म॰॥ पिंष्यां १ पिंष्याव २ पिंष्याम
३ उ॰॥ आशीर्लिङ्॥ पिंष्यात् १ पिंष्यास्तां २ पिंष्यासुः ३ प्र॰॥ पिंष्याः १
पिंष्यास्तं २ पिंष्यास्त ३ म॰॥ पिंष्यासं १ पिंष्यास्व २ पिंष्यास्म ३ उ॰॥ लुङ्॥
अपिषत् १ अपिषतां २ अपिषन् ३ प्र॰॥ अपिषः १ अपिषतं २ अपिषत ३
म॰॥ अपिषं १ अपिषाव २ अपिषाम ३ उ॰॥ लृङ्॥ अपेक्ष्यत् १ अपेक्ष्य
तां २ अपेक्ष्यन् ३ प्र॰॥ अपेक्ष्यः १ अपेक्ष्यतं २ अपेक्ष्यत ३ म॰॥ अपेक्ष्यं १
अपेक्ष्याव २ अपेक्ष्याम ३ उ॰॥ ॥अथ उविकरणः सकर्मक उभयप
दवान् करणार्थकः डुकृञ् धातुः॥ तत्र परस्मैपदानि॥ लट्॥ करोति १ कु
रुतः २ कुर्वंति ३ प्र॰॥ करोषि १ कुरुथः २ कुरुथ ३ म॰॥ करोमि १ कुर्वः २
कुर्मः ३ उ॰॥ लिट्॥ चकार १ चक्रतुः २ चक्रुः ३ प्र॰॥ चकर्थ १ चक्रथुः ३
चक्र ३ म॰॥ चकार १ चकर १ चकृव २ चकृम ३ उ॰॥ लुट्॥ कर्ता १ कर्ता ४२

रौ २ कर्तारः ३ प्र॰॥ कर्तासि १ कर्तास्थः २ कर्तास्थ ३ म॰॥ कर्तास्मि १ कर्ता
स्वः २ कर्तास्मः ३ उ॰॥ लृट्॥ करिष्यति १ करिष्यतः २ करिष्यंति ३ प्र॰॥ करि
ष्यसि १ करिष्यथः २ करिष्यथ ३ म॰॥ करिष्यामि १ करिष्यावः २ करिष्या
मः ३ उ॰॥ लोट्॥ करोतु १ कुरुतात् १ कुरुतां २ कुर्वंतु ३ प्र॰॥ कुरु १ कु
रुतात् १ कुरुतं २ कुरुत ३ म॰॥ करवाणि १ करवाव २ करवाम ३ उ॰॥
लङ्॥ अकरोत् १ अकुरुतां २ अकुर्वन् ३ प्र॰॥ अकरोः १ अकुरुतं २
अकुरुत ३ म॰॥ अकरवं १ अकुर्व २ अकुर्म ३ उत्तमः॥ विधिलिङ्॥
कुर्यात् १ कुर्यातां २ कुर्युः ३ प्र॰॥ कुर्याः १ कुर्यातं २ कुर्यात ३ म॰॥ कुर्यां
१ कुर्याव २ कुर्याम ३ उ॰॥ आशीर्लिङ्॥ क्रियात् १ क्रियास्तां २ क्रिया
सुः ३ प्र॰॥ क्रियाः १ क्रियास्तं २ क्रियास्त ३ म॰॥ क्रियासं १ क्रिया
स्व २ क्रियास्म ३ उ॰॥ लुङ्॥ अकार्षीत् १ अकार्ष्टां २ अकार्षुः ३ प्र॰
अकार्षीः १ अकार्ष्टं २ अकार्ष्ट ३ म॰॥ अकार्षं १ अकार्ष्व २ अकार्ष्म ३

उ०॥लृङ्॥अकरिष्यत्१ अकरिष्यतां२ अकरिष्यन्३प्र०॥अकरिष्यः१
अकरिष्यतं२ अकरिष्यत३म०॥अकरिष्यं१ अकरिष्याव२ अकरिष्याम
३उ०॥अथात्मनेपदानि॥लट्॥कुरुते१ कुर्वाते२ कुर्वते३प्र०॥कुरुषे१ कु
र्वाथे२ कुरुध्वे३म०॥कुर्वे१ कुर्वहे२ कुर्महे३उ०॥लिट्॥चक्रे१ चक्रा
ते२ चक्रिरे३प्र०॥चकृषे१ चक्राथे२ चकृढ्वे३म०॥चक्रे१ चकृवहे२
चकृमहे३उ०॥लुट्॥कर्ता१ कर्तारौ२ कर्तारः३प्र०॥कर्तासे१ कर्तासा
थे२ कर्ताध्वे३म०॥कर्ताहे१ कर्तास्वहे२ कर्तास्महे३उ०॥लृट्॥करि
ष्यते१ करिष्येते२ करिष्यंते३प्र०॥करिष्यसे१ करिष्येथे२ करिष्यध्वे३
म०॥करिष्ये१ करिष्यावहे२ करिष्यामहे३उ०॥लोट्॥कुरुतां१ कुर्वा
तां२ कुर्वतां३प्र०॥कुरुष्व१ कुर्वाथां२ कुरुध्वं३म०॥करवै१ करवाव
हे२ करवामहे३उ०॥लङ्॥अकुरुत१ अकुर्वातां२ अकुर्वत३प्र०॥



अकुरुथाः१ अकुर्वाथां२ अकुरुध्वं३म०॥अकुर्वि१ अकुर्वहि२ अकुर्म
हि३उ०॥विधिलिङ्॥कुर्वीत१ कुर्वीयातां२ कुर्वीरन्३प्र०॥कुर्वीथाः१ कु
र्वीयाथां२ कुर्वीध्वं३म०॥कुर्वीय१ कुर्वीवहि२ कुर्वीमहि३उ०॥आशीर्लि
ङ्॥कृषीष्ट१ कृषीयास्तां२ कृषीरन्३प्र०॥कृषीष्ठाः१ कृषीयास्थां२ कृ
षीढ्वं३म०॥कृषीय१ कृषीवहि२ कृषीमहि३उ०॥लुङ्॥अकृत१ अकृ
षातां२ अकृषत३प्र०॥अकृथाः१ अकृषाथां२ अकृढ्वं३म०॥अकृषि१
अकृष्वहि२ अकृष्महि३उ०॥लृङ्॥अकरिष्यत१ अकरिष्येतां२ अकरिष्यं
त३ अकरिष्यथाः१ अकरिष्येथां२ अकरिष्यध्वं३म०॥अकरिष्ये१ अ
करिष्यावहि२ अकरिष्यामहि३उ०॥ ॥अथश्नाविकरणः सकर्मकः
परस्मैपदवान् स्तेयार्थको मुष्धातुः॥लट्॥मुष्णाति१ मुष्णीतः२ मु
ष्णंति३प्र०॥मुष्णासि१ मुष्णीथः२ मुष्णीथ३म०॥मुष्णामि१ मुष्णी
वः२ मुष्णीमः३उ०॥लिट्॥मुमोष१ मुमुषतुः२ मुमुषुः३प्र०॥मुमोषिथ१

ना०रू मुषथुः २ मुमुष ३ म०॥ ... २ मुमुषिम ३ उ०॥ लुट् ॥

१६ ता १ मोषितारौ २ मोषितारः ३ प्र०॥ मोषितासि १ मोषितास्थः २ मोषितास्थ
३ म०॥ मोषितास्मि १ मोषितास्वः २ मोषितास्मः ३ उ०॥ लृट् ॥ मोषिष्यति १
मोषिष्यतः २ मोषिष्यंति ३ प्र०॥ मोषिष्यसि १ मोषिष्यथः २ मोषिष्यथ ३
म०॥ मोषिष्यामि १ मोषिष्यावः २ मोषिष्यामः ३ उ०॥ लोट् ॥ मुष्णातु १
मुष्णीतात् १ मुष्णीतां २ मुष्णंतु ३ प्र०॥ मुषाण १ मुष्णीतात् १ मुष्णीतं २
मुष्णीत ३ म०॥ मुष्णानि १ मुष्णाव २ मुष्णाम ३ उ०॥ लङ् ॥ अमुष्णात् १
अमुष्णीतां २ अमुष्णन् ३ प्र०॥ अमुष्णाः १ अमुष्णीतं २ अमुष्णीत ३ म०॥
अमुष्णां १ अमुष्णीव २ अमुष्णीम ३ उत्तमः॥ विधिलिङ् ॥ मुष्णीयात् १
मुष्णीयातां २ मुष्णीयुः ३ प्र०॥ मुष्णीयाः १ मुष्णीयातं २ मुष्णीयात ३ म०॥
मुष्णीयां १ मुष्णीयाव २ मुष्णीयाम ३ उ०॥ आशीर्लिङ् ॥ मुष्यात् १ मुष्या
स्तां २ मुष्यासुः ३ प्र०॥ मुष्याः १ मुष्यास्तं २ मुष्यास्त ३ म०॥ मुष्यासं १ मुष्या ४

स्व २ मुष्यास्म ३ उ०॥ लुङ् ॥ अमोषीत् १ अमोषिष्टां २ अमोषिषुः ३ प्र०॥ अमो
षीः १ अमोषिष्टं २ अमोषिष्ट ३ म०॥ अमोषिषं १ अमोषिष्व २ अमोषिष्म
३ उ०॥ लृङ् ॥ अमोषिष्यत् १ अमोषिष्यतां २ अमोषिष्यन् ३ प्र०॥ अमोषि
ष्यः १ अमोषिष्यतं २ अमोषिष्यत ३ म०॥ अमोषिष्यं १ अमोषिष्याव २ अमो
षिष्याम ३ उ०॥ ॥ अथाकर्मकाद्धातोर्भावे लडादयो लिख्यंते॥ तत्र प्रथमपुरु
षस्यैकवचनमेव भवति॥ सत्तार्थको भू धातुः॥ लट् ॥ भूयते॥ लिट् ॥ बभूवे॥
लुट् ॥ भाविता - भविता॥ लृट् ॥ भाविष्यते - भविष्यते॥ लोट् ॥ भूयतां॥ लङ्
॥ अभूयत॥ विधिलिङ् ॥ भूयेत॥ आशीर्लिङ् ॥ भाविषीष्ट - भविषीष्ट॥ लुङ्
अभावि॥ लृङ् ॥ अभाविष्यत - अभविष्यत॥ ॥ प्राणधारणार्थको जीव धा
तुः॥ लट् ॥ जीव्यते॥ लिट् ॥ जिजीवे॥ लुट् ॥ जीविता॥ लृट् ॥ जीविष्यते॥ लोट्
॥ जीव्यतां॥ लङ् ॥ अजीव्यत॥ विधिलिङ् ॥ जीव्येत॥ आशीर्लिङ् ॥ जीविषी
ष्ट॥ लुङ् ॥ अजीवि॥ लृङ् ॥ अजीविष्यत॥ ॥ अथ सकर्मकाद्धातोः कर्म

णिलङादयः॥तत्रादौधारणपोषणार्थकोभृञ् धातुः॥लट्॥भ्रियते १ भ्रिये
ते २ भ्रियंते ३ प्र॰॥भ्रियसे १ भ्रियेथे २ भ्रियध्वे ३ म॰॥भ्रिये १ भ्रियावहे २ भ्रि
यामहे ३ उ॰॥लिट्॥बभ्रे १ बभ्राते २ बभ्रिरे ३ प्र॰॥बभृषे १ बभ्राथे २ बभृढ्वे ३
म॰॥बभ्रे १ बभृवहे २ बभृमहे ३ उ॰॥लुट्॥भर्ता १ भर्तारौ २ भर्तारः ३ प्र॰॥भ
र्तासे १ भर्तासाथे २ भर्ताध्वे ३ म॰॥भर्ताहे १ भर्तास्वहे २ भर्तास्महे ३ उ॰॥–भा
रिता १ भारितारौ २ भारितारः ३ प्र॰॥भारितासे १ भारितासाथे २ भारिताध्वे ३
म॰॥भारिताहे १ भारितास्वहे २ भारितास्महे ३ उ॰॥लृट्॥भरिष्यते १ भरिष्ये
ते २ भरिष्यंते ३ प्र॰॥भरिष्यसे १ भरिष्येथे २ भरिष्यध्वे ३ म॰॥भरिष्ये १ भरि
ष्यावहे २ भरिष्यामहे ३ उ॰॥–भारिष्यते १ भारिष्येते २ भारिष्यंते ३ प्र॰॥भारिष्यसे १
भारिष्येथे २ भारिष्यध्वे ३ म॰॥भारिष्ये १ भारिष्यावहे २ भारिष्यामहे ३ उ॰
॥लोट्॥भ्रियतां १ भ्रियेतां २ भ्रियंतां ३ प्र॰॥भ्रियस्व १ भ्रियेथां २ भ्रियध्वं ३
म॰॥भ्रियै १ भ्रियावहै २ भ्रियामहै ३ उ॰॥लङ्॥अभ्रियत १ अभ्रियेतां २ ४

अभ्रियंत ३ प्र॰॥अभ्रियथाः १ अभ्रियेथां २ अभ्रियध्वं ३ म॰॥अभ्रिये १
अभ्रियावहि २ अभ्रियामहि ३ उ॰॥विधिलिङ्॥भ्रियेत १ भ्रियेयातां २ भ्रि
येरन् ३ प्र॰॥भ्रियेथाः १ भ्रियेयाथां २ भ्रियेध्वं ३ म॰॥भ्रियेय १ भ्रियेवहि २
भ्रियेमहि ३ उ॰॥आशीर्लिङ्॥भृषीष्ट १ भृषीयास्तां २ भृषीरन् ३ प्र॰॥
भृषीष्ठाः १ भृषीयास्थां २ भृषीढ्वं ३ म॰॥भृषीय १ भृषीवहि २ भृषीमहि ३ उ॰–
भारिषीष्ट १ भारिषीयास्तां २ भारिषीरन् ३ प्र॰॥भारिषीष्ठाः १ भारिषीयास्थां २
भारिषीढ्वं ३ भारिषीध्वं ३ म॰॥भारिषीय १ भारिषीवहि २ भारिषीमहि ३ उ॰॥
लुङ्॥अभारि १ अभृषातां २ अभृषत ३ प्र॰॥अभृथाः १ अभृषाथां २ अभृढ्वं ३
म॰॥अभृषि १ अभृष्वहि २ अभृष्महि ३ उ॰॥–अभारि १ अभारिषातां २ अ
भारिषत ३ प्र॰॥अभारिष्ठाः १ अभारिषाथां २ अभारिढ्वं ३ अभारिध्वं ३ म॰॥
अभारिषि १ अभारिष्वहि २ अभारिष्महि ३ उ॰॥लृङ्॥अभरिष्यत १ अभरिष्ये
तां २ अभरिष्यंत ३ प्र॰॥अभरिष्यथाः १ अभरिष्येथां २ अभरिष्यध्वं ३ म॰॥अभ

प्रा०रू० रिष्ये १ अभरिष्यावहि २ अभरिष्यामहि ३ उ०—अभारिष्यत १ अ भारिष्येतां २
१८ अभारिष्यंत ३ प्र०॥ अभारिष्यथाः १ अभारिष्येथां २ अभारिष्यध्वं ३ म०॥
अभारिष्ये १ अभारिष्यावहि २ अभारिष्यामहि ३ उ०॥ शक्त्यर्थकः शक्लृधा
तुः॥ लट्॥ शक्यते १ शक्येते २ शक्यंते ३ प्र०॥ शक्यसे १ शक्येथे २ शक्यध्वे ३
म०॥ शक्ये १ शक्यावहे २ शक्यामहे ३ उ०॥ लिट्॥ शेके १ शेकाते २ शेकिरे ३
प्र०॥ शेकिषे १ शेकाथे २ शेकिध्वे ३ म०॥ शेके १ शेकिवहे २ शेकिमहे ३ उ०॥ लु
ट्॥ शक्ता १ शक्तारौ २ शक्तारः ३ प्र०॥ शक्तासे १ शक्तासाथे २ शक्ताध्वे ३ म०
शक्ताहे १ शक्तास्वहे २ शक्तास्महे ३ उ०॥ लृट्॥ शक्ष्यते १ शक्ष्येते २ शक्ष्यंते ३
प्र०॥ शक्ष्यसे १ शक्ष्येथे २ शक्ष्यध्वे ३ म०॥ शक्ष्ये १ शक्ष्यावहे २ शक्ष्यामहे ३ उ०॥
लोट्॥ शक्यतां १ शक्येतां २ शक्यंतां ३ प्र०॥ शक्यस्व १ शक्येथां २ शक्यध्वं ३
म०॥ शक्यै १ शक्यावहै २ शक्यामहै ३ उ०॥ लङ्॥ अशक्यत १ अशक्येतां २ अ
शक्यंत ३ प्र०॥ अशक्यथाः १ अशक्येथां २ अशक्यध्वं ३ म०॥ अशक्ये १ अश ४६

क्यावहि २ अशक्यामहि ३ उ०॥ विधिलिङ्॥ शक्येत १ शक्येयातां २ शक्येरन्
३ प्र०॥ शक्येथाः १ शक्येयाथां २ शक्येध्वं ३ म०॥ शक्येय १ शक्येवहि २ श
क्येमहि ३ उ०॥ आशीर्लिङ्॥ शक्षीष्ट १ शक्षीयास्तां २ शक्षीरन् ३ प्र०॥ शक्षी
ष्ठाः १ शक्षीयास्थां २ शक्षीध्वं ३ म०॥ शक्षीय १ शक्षीवहि २ शक्षीमहि ३ उ०॥
लुङ्॥ अशाकि १ अशक्षातां २ अशक्षत ३ प्र०॥ अशक्थाः १ अशक्षाथां २
अशग्ध्वं ३ म०॥ अशक्षि १ अशक्ष्वहि २ अशक्ष्महि ३ उ०॥ लृङ्॥ अशक्ष्यत १
अशक्ष्येतां २ अशक्ष्यंत ३ प्र०॥ अशक्ष्यथाः १ अशक्ष्येथां २ अशक्ष्यध्वं ३ म०
अशक्ष्ये १ अशक्ष्यावहि २ अशक्ष्यामहि ३ उ०॥ गत्यर्थको गम्लृधातुः॥ लट्॥
गम्यते १ गम्येते २ गम्यंते ३ प्र०॥ गम्यसे १ गम्येथे २ गम्यध्वे ३ म०॥ गम्ये १ ग
म्यावहे २ गम्यामहे ३ उ०॥ लिट्॥ जग्मे १ जग्माते २ जग्मिरे ३ प्र०॥ जग्मिषे १
जग्माथे २ जग्मिध्वे ३ म०॥ जग्मे १ जग्मिवहे २ जग्मिमहे ३ उ०॥ लुट्॥ गंता १ गंता
रौ २ गंतारः ३ प्र०॥ गंतासे १ गंतासाथे २ गंताध्वे ३ म०॥ गंताहे १ गंतास्वहे २

धा० रू० गंतास्महे ३उ०॥ ऌट्॥गंस्यते १ गंस्येते २ गंस्यंते ३प्र०॥गंस्यसे १ गंस्येथे २
१९ गंस्यध्वे ३ म०॥गंस्ये १ गंस्यावहे २ गंस्यामहे ३उ०॥लोट्॥गम्यतां १ गम्येतां २
गम्यंतां ३प्र०॥गम्यस्व १ गम्येथां २ गम्यध्वं ३ म०॥ गम्ये १ गम्यावहै २ गम्या
महै ३उ०॥लङ्॥अगम्यत १ अगम्येतां २ अगम्यंत ३प्र०॥अगम्यथाः १ अ
गम्येथां २ अगम्यध्वं ३ म०॥ अगम्ये १ अगम्यावहि २ अगम्यामहि ३उ०॥ वि
धिलिङ्॥गम्येत १ गम्येयातां २ गम्येरन् ३प्र०॥ गम्येथाः १ गम्येयाथां २ ग
म्येध्वं ३ म०॥गम्येय १ गम्येवहि २ गम्येमहि ३उ०॥आशीर्लिङ्॥गसीष्ट १
गसीयास्तां २ गसीरन् ३प्र०॥ गसीष्ठाः १ गसीयास्थां २ गसीध्वं ३ म०॥ ग
सीय १ गसीवहि २ गसीमहि ३उ०॥- गंसीष्ट १ गंसीयास्तां २ गंसीरन् ३प्र०
गंसीष्ठाः १ गंसीयास्थां २ गंसीध्वं ३ म०॥ गंसीय १ गंसीवहि २ गंसीमहि ३उ०॥
लुङ्॥अगामि १ अगंसातां २ अगंसत ३प्र०॥ अगंस्थाः १ अगंसाथां २ अगं
ध्वं ३ म०॥ अगंसि १ अगंस्वहि २ अगंस्महि ३उ०॥ - अगामि १ अगसातां २ ४७

अगसत ३प्र०॥ अगथाः १ अगसाथां २ अगध्वं ३ म०॥ अगसि १ अगस्वहि २
अगस्महि ३उ०॥ऌङ्॥अगंस्यत १ अगंस्येतां २ अगंस्यंत ३प्र०॥ अगंस्य
थाः १ अगंस्येथां २ अगंस्यध्वं ३ म०॥अगंस्ये १ अगंस्यावहि २ अगंस्यामहि ३
उ०॥हिंसार्थकोहन्धातुः॥लट्॥हन्यते १ हन्येते २ हन्यंते ३प्र०॥हन्यसे १ ह
न्येथे २ हन्यध्वे ३ म०॥हन्ये १ हन्यावहे २ हन्यामहे ३उ०॥ लिट्॥जघ्ने १ ज
घ्नाते २ जघ्निरे ३प्र०॥जघ्निषे १ जघ्नाथे २ जघ्निध्वे ३ म०॥जघ्ने १ जघ्निवहे २
जघ्निमहे ३उ०॥लुट्॥हंता १ हंतारौ २ हंतारः ३प्र०॥हंतासे १ हंतासाथे २ हं
ताध्वे ३ म०॥हंताहे १ हंतास्वहे २ हंतास्महे ३॥उ०॥- घानिता १ घानितारौ २
घानितारः ३प्र०॥घानितासे १ घानितासाथे २ घानिताध्वे ३ म०॥ घानि
ताहे १ घानितास्वहे २ घानितास्महे ३उ०॥ऌट्॥हनिष्यते १ हनिष्येते २ ह
निष्यंते ३प्र०॥हनिष्यसे १ हनिष्येथे २ हनिष्यध्वे ३ म०॥हनिष्ये १ हनिष्या
वहे २ हनिष्यामहे ३उ०॥- घानिष्यते १ घानिष्येते २ घानिष्यंते ३प्र०॥घा

 निष्यसे १ घानिष्येथे २ घानिष्यध्वे ३ म० ॥ घानिष्ये १ घानिष्यावहे २ घानि
 ष्यामहे ३ उ० ॥ लोट् ॥ हन्यताम् १ हन्येताम् २ हन्यंताम् ३ प्र० ॥ हन्यस्व १ हन्ये
थाम् २ हन्यध्वं ३ म० ॥ हन्ये १ हन्यावहै २ हन्यामहै ३ उ० ॥ लङ् ॥ अहन्यत १
अहन्येताम् २ अहन्यंत ३ प्र० ॥ अहन्यथाः १ अहन्येथां २ अहन्यध्वं ३ म० ॥ अ
हन्ये १ अहन्यावहि २ अहन्यामहि ३ उ० ॥ विधिलिङ् ॥ हन्येत १ हन्येयाताम्
२ हन्येरन् ३ प्र० ॥ हन्येथाः १ हन्येयाथां २ हन्येध्वम् ३ म० ॥ हन्येय १ हन्येवहि
२ हन्येमहि ३ उ० ॥ आशीर्लिङ् ॥ घानिषीष्ट १ घानिषीयास्तांम् २ घानिषी
रन् ३ प्र० ॥ घानिषीष्ठाः १ घानिषीयास्थां २ घानिषीध्वं ३ म० ॥ घानिषीय १
घानिषीवहि २ घानिषीमहि ३ उ० ॥ — वधिषीष्ट १ वधिषीयास्तां २ वधिषीरन् ३
प्र० ॥ वधिषीष्ठाः १ वधिषीयास्थां २ वधिषीध्वं ३ म० ॥ वधिषीय १ वधिषीवहि २
वधिषीमहि ३ उ० ॥ लुङ् ॥ अघानि १ अहसातां २ अहसत ३ प्र० ॥ अहथाः १
अहसाथां २ अहध्वं ३ म० ॥ अहसि १ अहस्वहि २ अहस्महि ३ उ० ॥ — अघा 

नि १ अघानिषातां २ अघानिषत ३ प्र० ॥ अघानिष्ठाः १ अघानिषाथां २ अघा
निढ्वम् ३ म० ॥ अघानिषि १ अघानिष्वहि २ अघानिष्महि ३ उ० ॥ — अवधि १
अवधिषातां २ अवधिषत ३ प्र० ॥ अवधिष्ठाः १ अवधिषाथां २ अवधिढ्वं ३
म० ॥ अवधिषि १ अवधिष्वहि २ अवधिष्महि ३ उ० ॥ ऌङ् ॥ अघानिष्य
त १ अघानिष्येतां २ अघानिष्यंत ३ प्र० ॥ अघानिष्यथाः १ अघानिष्येथा
म् २ अघानिष्यध्वम् ३ म० ॥ अघानिष्ये १ अघानिष्यावहि २ अघानिष्या
महि ३ उ० ॥ — अहनिष्यत १ अहनिष्येतां २ अहनिष्यंत ३ प्र० ॥ अहनि
ष्यथाः १ अहनिष्येथां २ अहनिष्यध्वं ३ म० ॥ अहनिष्ये १ अहनिष्यावहि
२ अहनिष्यामहि ३ उ० ॥ द्वैधीकरणार्थकः सकर्मकश्छिदिधातुः ॥ लट् ॥
छिद्यते १ छिद्येते २ छिद्यंते ३ प्र० ॥ छिद्यसे १ छिद्येथे २ छिद्यध्वे ३ म० ॥
छिद्ये १ छिद्यावहे २ छिद्यामहे ३ उ० ॥ लिट् ॥ चिच्छिदे १ चिच्छिदाते २ चि
च्छिदिरे ३ प्र० ॥ चिच्छिदिषे १ चिच्छिदाथे २ चिच्छिदिध्वे ३ म० ॥ चिच्छिदे १

धा०रू० च्चिच्छिदिवहे २ चिच्छिदिमहे ३उ०॥लुट्॥छेत्ता १ छेत्तारौ २ छेत्तारः ३प्र०॥
२१ छेत्तासे १ छेत्तासाथे २ छेत्ताध्वे ३म०॥छेत्ताहे १ छेत्तास्वहे २ छेत्तास्महे ३
उ०॥लृट्॥छेत्स्यते १ छेत्स्येते २ छेत्स्यंते ३प्र०॥छेत्स्यसे १ छेत्स्येथे २ छेत्स्य
ध्वे ३म०॥छेत्स्ये १ छेत्स्यावहे २ छेत्स्यामहे ३उ०॥लोट्॥छिद्यतां १ छिद्ये
तां २ छिद्यंतां ३प्र०॥छिद्यस्व १ छिद्येथां २ छिद्यध्वं ३म०॥छिद्यै १ छिद्या
वहै २ छिद्यामहै ३उ०॥लङ्॥अछिद्यत १ अछिद्येतां २ अछिद्यंत ३प्र०
अछिद्यथाः १ अछिद्येथाम् २ अछिद्यध्वं ३म०॥अछिद्ये १ अछिद्यावहि
२ अछिद्यामहि ३उ०॥विधिलिङ्॥छिद्येत १ छिद्येयातां २ छिद्येरन् ३प्र०
छिद्येथाः १ छिद्येयाथां २ छिद्येध्वं ३म०॥छिद्येय १ छिद्येवहि २ छिद्येमहि
३उ०॥आशीर्लिङ्॥छित्सीष्ट १ छित्सीयास्तां २ छित्सीरन् ३प्र०॥छित्सी
ष्ठाः १ छित्सीयास्थां २ छित्सीध्वं ३म०॥छित्सीय १ छित्सीवहि २ छित्सी
महि ३उ०॥लुङ्॥अच्छेदि १ अच्छित्सातां २ अच्छित्सत ३प्र०॥अच्छित्थाः ४९

१ अच्छित्साथां २ अच्छिध्वं ३म०॥अच्छित्सि १ अच्छित्स्वहि २ अच्छित्स्महि
३उ०॥लृङ्॥अच्छेत्स्यत १ अच्छेत्स्येतां २ अच्छेत्स्यंत ३प्र०॥अच्छेत्स्यथाः
१ अच्छेत्स्येथां २ अच्छेत्स्यध्वं ३म०॥अच्छेत्स्ये १ अच्छेत्स्यावहि २ अच्छेत्स्या
महि ३उ०॥ ॥इति धातुरूपाणि॥ ॥अथ निडं तद्व्युत्पत्तिप्रकारः क
थ्यते॥तत्रापूर्वधातूत्पादनप्रकारः॥नाम्नो धात्वर्थे णिच्प्रत्ययः॥पटुमाच
ष्टे – पटयति॥एवं पटयत इत्यादि॥पटयते। पटयेते इत्यादि वा सर्वत्र॥अ
श्वेनातिक्रामति – अश्वयति॥हस्तिनातिक्रामति – हस्तयति॥कंसवधमा
चष्टे – कंसं घातयति॥असिना हंति – असयति॥अश्वं करोति – अश्वयति॥
घटं करोति – घटयति॥धातोः क्रियाप्रयोजके कर्तरि णिच्॥घटो भवति –
यज्ञदत्तः घटं भावयति। यज्ञदत्तो घटोत्पत्तेः प्रयोजककर्तेत्यर्थः॥देवदत्तो
ग्रामं गच्छति – यज्ञदत्तो देवदत्तं ग्रामं गमयति॥भुवनं तिष्ठति – ईश्वरो भुवनं
स्थापयति॥चित्तं दुष्यति – कामश्चित्तं दूषयति॥इच्छाकर्मभूतादिच्छासमा

मा०कौ० नाधिकरणाद्धातोरिच्छायांसन्॥स्वकर्तृकंपठनमिच्छति–पिपठिषति।
२२ पठितुमिच्छतीत्यर्थः॥रोदितुमिच्छति–रुरुदिषति॥गृहीतुमिच्छति–जि
घृक्षति॥प्रष्टुमिच्छति–पिपृच्छिषति॥कर्तुमिच्छति–चिकीर्षति॥भवि
तुमिच्छति–बुभूषति॥गंतुमिच्छति–जिगमिषति॥धातोराशंकायांस
न्॥कूलंपिपतिषति–कूलंपततिकिं।शंकितपतनाश्रयःकूलमित्यर्थः॥
वृक्षाञ्जिगमिषति–वृक्षागच्छतिकिं॥धातोःक्रियायाःपौनःपुन्येऽति
शयेचयङ्‌यङ्‌लुकौ॥भूधातुः॥बोभूयते–बोभोति–बोभवीति।पुनः
पुनरतिशयेनवाभवतीत्यर्थः॥सूचधातुः॥सोसूच्यते॥गत्यर्थाद्धातोः
कौटिल्येयङ्॥कुटिलंव्रजति–वाव्रज्यते॥कुटिलंगच्छति–जंगम्यते॥
धातोःक्रियागर्हायांयङ्॥गर्हितंचरति–चंचूर्यते॥गर्हितंलुंपति–लोलु
प्यते॥अथात्मसंबंधिभूताद्विभक्त्यंतान्नाम्नइच्छायांक्यच्काम्यचौ॥ऋ
षभमात्मनइच्छति–ऋषभीयति–ऋषभकाम्यति॥आत्मनःपुत्रमिच्छ ५०

ति–पुत्रीयति–पुत्रकाम्यति॥गामात्मनइच्छति–गव्यति–गोकाम्यति॥
यशस्यति–यशस्काम्यति॥कर्मरूपादुपमानात्सदृशाचारेक्यच्॥पुत्रमि
वाचरति–पुत्रीयति।छात्रंगुरुः।पुत्रकर्मकाचारसदृशोयःशिष्यकर्मका
चारस्तत्कर्तेत्यर्थः॥द्विजंविष्णुवदाचरति–विष्णूयति॥प्रासादेइवाचरति–
प्रासादीयतिकुट्यां॥कर्तृरूपादुपमानात्सदृशाचारेक्यङ्॥कृष्णइवाच
रति–कृष्णायते॥यशइवाचरति–यशायते।यशस्यतेवा॥विद्वानिवाचर
ति–विद्वायते॥कुमारीवाचरति–कुमारायते॥गुर्वीवाचरति–गुरूयते॥त्व
मिवाचरतित्वद्यते॥अहमिवाचरतिमद्यते॥हरिणीवाचरति–हरिणायते
॥हरितायते॥उपमानभूतात्कर्तुःसदृशाचारेक्विप्॥कृष्णइवाचरति–कृ
ष्णति॥मालेवाचरति–मालति॥कविरिवाचरति–कवयति॥पितेवाचर
ति–पितरति॥इदमिवाचरति–इदामति॥राजेवाचरति–राजानति॥द्यौरि
वाचरति–देवति॥भृशादिशब्देभ्योभवतीत्यर्थेऽभूततद्भावेक्यङ्॥अभृ

शोभृशो भवति–भृशायते॥लोहिताद्भवतीत्यर्थेऽभूततद्भावे क्यप्॥अ
लोहितो लोहितो भवति–लोहितायते–लोहितायति॥पटत्पटद्भवति–प
टपटायते॥कष्टशब्दात्क्रमतइत्यर्थे क्यष्॥कष्टाय क्रमते–कष्टायते।पा
पंकर्तुमुत्सहतइत्यर्थः॥शब्दादिशब्देभ्यः करोत्यर्थे क्यच्॥शब्दं करोति–
शब्दायते॥वैरं करोति–वैरायते॥मुंडादिशब्देभ्यो धात्वर्थे णिच्॥मुंडं क
रोति–मुंडयति॥हलिं गृण्हाति–हलयति॥तूस्तानि वहंति–तूस्तयति॥
पाशं विमुंचति–विपाशयति॥रूपं पश्यति–रूपयति॥वीणयोपगायति–
उपवीणयति॥तूलेनानुकुष्णाति–अनुतूलयति।तूलेनानु घट्टयतीत्यर्थः
॥श्लोकैरुपस्तौति–उपश्लोकयति॥सेनयाऽभियाति–अभिषेणयति॥
लोमान्यनुमार्ष्टि–अनुलोमयति॥वर्मणा संनह्यति–संवर्मयति॥इत्यपू
र्वधातूत्पादनप्रकारः॥ ॥अथ लकारार्थविचारः॥अनद्यतनभूतेस्मृ
तिबोधकपदयोगे यच्छब्दयोगाभावे लृट्॥यथा स्मरसि कृष्ण गोकुले व
त्स्यामः॥यच्छब्दयोगे तु।अभिजानासि कृष्ण यद्वने अभुंज्महि॥साकांक्ष
स्मृतिबोधकपदयोर्योगे भूतानद्यतने लृट् लङ् च॥स्मरसि कृष्ण गोकुले वत्स्या
मस्तत्र गाश्चारयिष्यामः॥स्मरसि कृष्ण गोकुलेऽवसाम तत्र गा अचारयाम
वा॥परोक्षेऽनद्यतनभूते लिट्॥रराजा चकार॥अपन्हवे लिट्॥कलिंगेषु या
त्सीरिति प्रश्ने।नाहं कलिंगान्जगामेत्युत्तरं सापन्हवं॥समीपकालप्रश्ने लिट्
प्राप्तौ लङ्लिटौ।देवदत्तः आगच्छत्किं।आजगाम किं॥स्मशब्दयोगे भूते
परोक्षानद्यतने लट्॥यजति स्म युधिष्ठिरः॥स्मयोगे अपरोक्षे भूतेऽनद्यतने
लट्॥एवं स्म पिता ब्रवीति॥ननुशब्दयोगे प्रश्नोत्तरे भूते लट्॥अकार्षीः कि
मिति प्रश्ने।ननु करोमि भो इत्युत्तरं॥नशब्दयोगे नुशब्दयोगे च प्रश्नोत्तरे भूते
लुङ् लट् वा॥अकार्षीः किमिति प्रश्ने।न करोमि–नाकार्षं वा।नु करोमि–न्व
कार्षं वेत्युत्तरं॥पुराशब्दयोगे स्मशब्दयोगाभावे भूतानद्यतने लुङ् लटौ॥इ
ह पुरा छात्रा अवात्सुः–वसंति वा॥इति भूतकालः॥अथ भविष्यत्कालः॥

 निश्चयद्योतकस्ययावच्छब्दस्यपुराशब्दस्यचयोगेभविष्यतिलट्॥यावद्भुंक्ते-
 पुराभुंक्ते।निश्चयंभोक्ष्यतेइत्यर्थः॥कदाकर्हिशब्दयोर्योगेलट्।यथायोगंलु
ट्लृटौवा॥कदाभुंक्ते-भोक्ष्यते-भोक्तावा॥कर्हिभुंक्ते-भोक्ष्यते-भोक्तावा॥
मुहूर्तानंतरेलङ्-ट्लृट्लुट्च॥उपाध्यायश्चेदागच्छत्-आगच्छति-आ
गमिष्यति-आगंतावा।अथत्वंछंदोधीष्व॥क्षिप्रवाचकशब्दयोगेलृट्॥वृष्टि
श्चेदाशुयास्यति-शीघ्रंवप्स्यामः॥आशंसावाचकयोगेलिङ्॥गुरुश्चेदुपेया
दाशंसेऽधीयीय॥इतिभविष्यत्कालः॥क्रियायाअनिष्पत्तौहेतुहेतुमद्भावादौ
भूतेभविष्यतिचलिङ्॥सुवृष्टिश्चेदभविष्यत्तदासुभिक्षमभविष्यत्॥वर्तमान
समीपेभूतेलुङ्लटौ॥कदाआगतोऽसि-अयमागच्छामि-आगमंवा॥वर्तमान
समीपेभविष्यतिलट्लृट्च॥कदाआगमिष्यसि-अयमागच्छामि-आगमि
ष्यामिवा॥इच्छार्थकपदयोगेलिङ्लोटौ॥इच्छामिभुंजीय-भुक्तांवाभवान्॥
इच्छार्थकधातोर्वर्तमानकालेलिङ्लटौ॥इच्छेत्-इच्छति॥क्रियाशक्तौलिङ् ५२

॥त्वं भारं दहेः॥ क्रियायोग्यतायां लिङ्॥ त्वं कन्यां वहेः॥ माङ्योगे लुङ्॥ मा
कार्षीः॥ उभयोर्धात्वोर्विशेष्यविशेषणभावे विशेष्यक्रियाकालानुरोधेन
विशेषणधातोर्भूतभविष्यद्वर्तमानकालाः॥ वसन्ददर्श॥ सोमयाजी भ
विता॥ आगतोऽस्मि॥ वक्ष्यमाण आस॥ इत्यादि॥ धात्वोः कार्यकारणभावे लि
ङ्॥ कृष्णं नमेच्चेत्सुखं यायात्॥ इति लकारार्थविचारः॥ इति तिङन्तव्युत्पत्ति
प्रकारः समाप्तः॥ ॥ शालिवाहनशकः १७६१॥ ॥



॥श्रीगणेशाय नमः॥ अथ तद्धितान्तशब्दकलापो लिख्यते॥ तत्र अपत्यमार
भ्य विकारपर्यन्तेष्वर्थेषु प्रत्ययाः॥ षष्ठ्यन्तादपत्यार्थे तद्धिते णकार ञकार कका
रवति प्रत्यये प्रथमाक्षरस्य अकारस्य आ – इकारस्य ऐकारस्य च ऐ – उकारस्य
ओकारस्य च औ॥ अण्॥ उपगोरपत्यं पुमान् औपगवः। अश्वपतेः आश्वपतं॥
दितेरदितेरादित्यात् पत्यन्तात् यमात् ञ्ण्यः॥ दैत्यः। आदित्यः। आदित्यः॥ प्राजाप
त्यः। याम्यः॥ पृथिव्याः ञः अञ्॥ पार्थिवा। पार्थिवी॥ देवात् यञ् अञ् च॥ दैव्यं। दैवं॥
बहिषः यञ् ईकक् च॥ बाह्यः। बाहीकः॥ स्थाम्नः अः॥ अश्वत्थामः॥ स्थाम्नः अस्य भ
वार्थे लुक्॥ अश्वत्थाम्नि भवः अश्वत्थामा॥ लोम्नः बहुषु अपत्येषु अः॥ उडुलोम्नः
अपत्यानि पुमांसः उडुलोमाः॥ गोः अजादिप्रत्ययप्राप्तौ यत्। गोरपत्यं गव्यं॥ अञ्
उत्सादिकेभ्यः॥ औत्सः॥ अग्नेः कलेश्च ढक्॥ अस्मिन् तद्धिते ढस्य एय् सर्वत्र॥
आग्नेयं। कालेयं॥ अथ अपत्यार्थमारभ्य भवनपर्यन्तार्थेषु स्त्रियो नञ्पुंसः स्नञ्॥
स्त्रैणः। पौंस्नः॥ षष्ठ्यन्तात् अपत्यार्थे॥ उपगोरपत्यमौपगवः। भानोरपत्यं भानवः। आ

तद्धि॰क॰ श्वपतः। दैत्यः। आदित्यः। आदित्यः। प्राजापत्यः। याम्यः। पार्थिवा। पार्थिवी। दैव्यं। दैवं।
१ बाह्यः। बाहीकः। अश्वत्थामः। अश्वत्थामा। उडुलोमाः। गव्यं। औत्सः। आग्नेयं। कालेयं।
स्त्रैणः। पौंस्नः॥ षष्ठ्यंतात् गोत्रापत्ये अण्॥ उपगोर्गोत्रापत्यमौपगवः॥ अकारांतात् इञ्
अपत्ये॥ दाक्षिः। बाह्वादिभ्यः इञ् अपत्ये॥ बाहविः। औडुलोमिः॥ आकृतिगणोयं॥
सुधातोः इञ् अकङ् च॥ सुधातोः सौधातकिः। व्यासस्य वैयासकिः। वरुडस्य वारु
डकिः। निषादस्य नैषादकिः। चंडालस्य चांडालकिः। बिंबस्य बैंबकिः॥ कुंजादिभ्यः
पौत्रादिके अपत्ये गोत्रसंज्ञके फञ् तद्धिते फस्य आयन् सर्वत्र तस्मात् यः॥ कौंजायन्यः
। ब्राध्नायन्यः॥ कुंजादिभ्यः बहुषु अपत्येषु यस्य लोपः॥ स्त्रियां तु कौंजायन्याः। कौंजा
यनाः। ब्राध्नायनाः॥ साक्षात् अपत्ये तु कुंजादिभ्यः इञ्॥ कौंजिः॥ गोत्रे फक् नडादि
भ्यः॥ नाडायनः। चारायणः। अनंतरापत्ये॥ नाडिः। चारिः॥ द्रोणात्पर्वताज्जीवंताद्गो
त्रे फक् विकल्पेन। पक्षे गोत्रे इञ्॥ अपत्ये पि इञ्॥ द्रोणायनः। द्रौणिः। पार्वतायनः। पा
र्वतिः। जैवंतायनः। जैवंतिः॥ गर्गादिभ्यो गोत्रे यञ्॥ गार्ग्यः। वात्स्यः। गोत्रे यञ् प्रत्यय ६०

स्य लुक् गोत्राणां बहुत्वे॥ गर्गाः। वत्साः। विदाः। उर्वाः॥ स्त्रियां तु न लुक्॥ गार्ग्यः॥ शिवादिभ्योऽपत्ये
अण्॥ शैवः। गांगः। तिकादिभ्योऽपत्ये फिञ्॥ तैकायनिः। गांगायनिः॥ शुभ्रादिभ्योऽपत्ये ढ
क्॥ शौभ्रेयः। गांगेयः॥ ऋषेरंधकात् वृष्णेः कुरोश्च अण् अपत्ये॥ ऋषेः। वासिष्ठः। वैश्वामि
त्रः। अंधकस्य श्वाफल्कः। वृष्णेर्वासुदेवः। आनिरुद्धः। कुरोर्नाकुलः। साहदेवः॥ अत्रेर्ढ
क् अपत्ये॥ आत्रेयः॥ संख्यासंभद्रेभ्यः परान्मातुरण् अपत्ये॥ द्वैमातुरः। षाण्मातुरः। सां
मातुरः। भाद्रमातुरः॥ कन्यायाः अण् अपत्ये॥ कानीनः॥ पीलायाः अपत्ये अण् ढक्
च। पैलः। पैलेयः। मंडूकात् ढक् अण् इञ् च अपत्ये। मांडूकेयः। मांडूकः। मांडूकिः। स्त्रीभ्यः
ढक्॥ वैनतेयः॥ द्व्यक्षरायाः स्त्रियाः ढक् अपत्ये॥ दात्तेयः। इकारांताद्व्यक्षरात् ढक् अपत्ये॥
दौलेयः। नैधेयः॥ इञ् इकारांतात्तु फक्॥ दाक्षायणः॥ कल्याण्यादिभ्योऽटगपत्ये॥ काल्याणिनेयः॥
बांधकिनेयः॥ कुलटाया ढक्॥ कौलटिनेयः। कौलटेयः॥ हृद्भग सिंधुपदं परकशब्दात्
अण् अपत्ये। सुहृदः। सौहार्दः। सुभगायाः सौभागिनेयः। सक्तुसिंधोः साक्तुसैंधवः॥
चटकाया अपत्ये ऐरक्॥ चाटकैरः। स्त्रीत्वे लुक्। चटका॥ गोधाया अपत्ये ढ्रक् आरक् च॥

गोधेरः। गोधारः॥क्षुद्राभ्यः द्रक् ढक् च॥काणेरः। काणेयः। दासेरः। दासेयः। पितृष्वसृ
मातृष्वसृभ्यां छण् ढक् च॥अत्र तद्धिते छस्य ईय्॥ पैतृष्वस्रीयः। पैतृष्वसेयः। मातृष्वस्रीयः
मातृष्वसेयः॥चतुष्पाद्भ्योऽस्त्र्येढञ्॥ कामंडलेयः॥अत्रेर्भृगोः कुत्सात् वसिष्ठात् गोतमा
त् अंगिरसश्च परस्य गोत्रप्रत्ययस्य लुक् गोत्रबहुत्वे॥ अत्रयः। भृगवः। कुत्साः। वसिष्ठाः।
गोतमाः। अंगिरसः॥ राज्ञः श्वशुरात् अपत्ये यत्॥ राजन्यः। श्वशुर्यः॥ अपत्येऽणि ब्रह्मणष्टिलो
पो न। ब्राह्मणः॥क्षत्रात् अपत्ये घः जातौ॥ अत्र तद्धिते घस्य इय्॥ क्षत्रियः॥ खः सपूर्वात्
कुलात्॥ खस्य ईन स्तद्धिते। आढ्यकुलीनः। कुलात् केवलात् यत् ढकञ् खश्च॥ कु
ल्यः। कौलेयकः कुलीनः। महाकुलात् खञ् अञ् खश्च। माहाकुलः। माहाकुलीनः। महाकु
लीनः॥ ढक् दुष्कुलात्॥ दौष्कुलेयः॥ छः स्वसुः॥ स्वस्रीयः॥ भ्रातुश्छः व्यच्च॥ भ्रात्रीयः।
भ्रातृव्यः॥ ठक् रैवत्यादिभ्यः॥ अत्र तद्धिते ठमात्रस्य इकः॥ रैवतिकः॥ कुर्वादिश
ब्देभ्यो ण्यः॥ कौरव्याः॥ वावदूक्यः॥ कारिवाचकादपि। नापित्यः। कौंभकार्यः॥ का
रिवाचकात् वा इञ्॥ कौंभकारिः। तांतुवायिः। नापितात्तु वा फिञ् न तु इञ्॥ नापि 
तायनिः॥ फिञ् तिकादिभ्यः अपत्ये। तैकायनिः॥ कौशल्यात् कार्मार्याश्च फिञ् अपत्ये।
कौशल्यायनिः। कार्मार्यायणिः॥ मनुशब्दात् अपत्ये जातौ यत् अञ् च तस्य च षुक्। मनुष्यः
मानुषः। देशवाचकात् क्षत्रियशब्दात् अञ् अपत्ये तस्य राजनि च। इक्ष्वाकोः अपत्यं राजा
च ऐक्ष्वाकः। पांचालः॥ पूरोरण् अपत्ये तस्य राजनि च। पौरव्यः। ड्यण् पांडोः साल्वेया
त् गांधारेश्च। पांड्यः। साल्वेयः। गांधारः। द्व्यक्षरात् मगधात् कलिंगात् शूरमसात् च
अण् तस्य राजनि अपत्ये च। आंगः। वांगः। सौह्मः। मागधः। कालिंगः। शौरमसः॥ कुरुश
ब्दात् नकारादिभ्यश्च ण्यप्रत्ययः राज्ञि अपत्ये च। कौरव्यः। नैषध्यः॥ कुरुशब्दात् स्त्रि
यां लुक्॥ कुरूः॥ इत्यपत्यार्थाः प्रत्ययाः समाप्ताः॥ ॥ तृतीयांतरंगवाचका
त् रक्तार्थे अण्॥ मंजिष्ठया रक्तं मांजिष्ठं। लाक्षाया रोचनाच्च ठक्। लाक्षिकः। रौचनि
कः। शाकलात् कर्दमात् ठक् अण् च॥ शाकलिकः। शाकलः। कार्दमिकः। कार्दमः॥
अन् नील्याः। नीलं॥ कन् पीतात् पीतकं॥ अञ् हरिद्रा महारजनाभ्यां। हारिद्रं माहारजनं॥
तृतीयांत नक्षत्रात् युक्तकालार्थे अण्। पुष्येण युक्तं पौषमहः। पौषी रात्रिः॥ पष्टिदं

 डात्मक दिवसे लुप्। पुष्यः॥ नक्षत्रद्वंद्वात् युक्तकाले छः। तद्धिते सर्वत्र छः। ईय्।
२ तिष्यपुनर्वसवीयमहः। राधानुराधीया रात्रिः॥ तृतीयांतात् दृष्टसामार्थे अण्। वसिष्ठे
न दृष्टं साम वासिष्ठं। उशनसा दृष्टं सामौशनसं॥ ढक् कलेः। कालेयं॥ विकारांतेषु सर्वेषु
अर्थेषु अग्नेः कलेश्च ढक्। अग्निना दृष्टं अग्नौ भवं अग्नेरागतं आग्नेयं। एवं कालेयं॥
तृतीयांत वामदेवात् दृष्टसामार्थे ड्यः। वामदेव्यं॥ तृतीयांतात्सप्तमंतात् परिवृतरथार्थे
अण्। वस्त्रैः परिवृतो वास्त्रो रथः॥ इनिः पांडुकंबलात्। पांडुकंबली॥ द्वैपात् वैयाघ्रात्
च अञ्। द्वैपेन वैयाघ्रेण वा परिवृतो रथः द्वैपः। वैयाघ्रः॥ षष्ठ्यंत कुमारशब्दात् अपूर्वपत्यर्थे
ण्। अपूर्वपतिं कुमारीं उपपन्नः पतिः कौमारः। अपूर्वपतिं कुमारं उपपन्ना भार्या कौमारी॥ सप्तम्यंतामत्रात् उ
द्धृत्यनिहितार्थे अण्। शरावे उद्धृत्य निहितः शाराव ओदनः॥ सप्तम्यंतात्स्थंडिलात् शयि
तरि अण्। स्थंडिले शयितुं नियमवान् स्थांडिलः॥ सप्तम्यंतात्संस्कृतभक्षार्थे अण्। भ्राष्ट्रे
संस्कृता भक्षाः भ्राष्ट्राः॥ शूलात् उखायाश्च यत्। शूल्यं। उख्यं॥ ठक् दध्नः। दाधिकं॥ उदश्वितः
ठक् अण् च। अत्र ठस्य कः। औदश्वित्कः। औदश्वितः॥ सप्तम्यंत क्षीरात्संस्कृतार्थे। क्षीरे सं ६२

स्कृता क्षैरेयी यवागूः॥ प्रथमांतात्पौर्णमासीमति अर्थे अण्। पौषी पूर्णिमास्मिन्निति पौषो
मासः॥ आग्रहायण्याः अश्वत्थाच्च ठक्। अग्रे हायनं यस्याः सा आग्रहायणी पौर्णमासी अस्मि
न्निति आग्रहायणिको मासः। अश्वत्थयुक्ता अश्वत्था सा पौर्णमासी अस्मिन्निति आश्वत्थिको
मासः॥ फाल्गुन्याः श्रावण्याः कार्तिक्याः चैत्र्याश्च ठक् अण् च। फाल्गुनिकः। फाल्गुनः।
श्रावणिकः। श्रावणः। कार्तिकिकः। कार्तिकः। चैत्रिकः। चैत्रः॥ प्रथमांताद्देवतावति अर्थे
अण्। इंद्रो देवतास्येन्द्रं हविः। पाशुपतं। बार्हस्पत्यं। गाणपतं। आदित्यं। प्राजापत्यं। ऐंद्रो मं
त्रः। को देवतास्य कायं। श्रीर्देवतास्य श्रायं॥ शुक्रशब्दात् घन्। घस्य इय् तद्धिते। शुक्रि
यं। अपोनप्तुः। अपांनप्तुः॥ शतरुद्राच्च घछौ च। अपोनप्त्रियं। अपांनप्त्रियं। अपोनप्त्रीयं। अपांनप्त्रीयं।
शतं रुद्रा देवतास्य शतरुद्रियं। शतरुद्रीयं॥ महेंद्रात् घः अण् छश्च। महेंद्रियं। माहेंद्रं। महें
द्रीयं॥ ष्यण् सोमात्। सौम्यं॥ वायोः ऋतोः पितुः उषसश्च यत्। वायव्यं। ऋतव्यं। पित्र्यं। उष
स्यं॥ द्यावापृथिवीशब्दात् शुनासीरात् मरुत्वतः अग्नीषोमशब्दात् वास्तोष्पतेः गृह
मेधात् च छः यश्च। द्यावापृथिवीयं। द्यावापृथिव्यं। शुनासीरीयं। शुनासीर्यं। मरुत्वतीयं। म

रुद्रत्यं। अग्नीषोमीयं। आग्नीषोम्यं। वास्तोष्पतीयं। वास्तोष्पत्यं। गृहमेधीयं। गृहमेध्यं॥
ढक् अग्नेः। आग्नेयं। महाराजात् प्रोष्ठपदात् ठञ्। माहाराजिकं। प्रौष्ठपदिकं॥ देवता
द्वंद्वे क्वचित् उभयोःपदयोः अकारस्याकारः। इकारस्य एकारस्य च ऐकारः। उकार
स्य ओकारस्य च औकारः। आग्निमारुतं॥ पितुर्भ्रातरि व्यत्। पितृव्यः॥ मातुर्भ्रातरि
डुलच्। मातुलः॥ मातृशब्दात् पितरि डामहच्। मातामहः। स्त्रियां मातामही। पितुः
स्तु पितरि डामहच्। पितामहः। स्त्रियां पितामही॥ षष्ठ्यंतात्समूहार्थे अण्। काकानां समू
हः काकं। बाकं॥ अण् भिक्षादिभ्यः। भैक्षं। गार्भिणं। युवतीनां समूहो यौवनं॥ गोत्रा
त् उक्षादिभ्यश्च वुञ्। अनुनासिक वु इत्येतस्य अक इत्यादेशः। ग्लुचुकायनीनां समूहो
ग्लौचुकायनकं। औक्षकं। औष्ट्रकं। औरभ्रकं। राजकं। राजन्यकं। राजपुत्रकं। वात्सकं।
मानुष्यकं। वार्धकं॥ केदारात् यञ् वुञ् च। कैदार्यं। कैदारकं॥ गणिकाया यञ्। गाणिक्यं॥
केदारकवचिभ्यां ठञ्। कावचिकं। कैदारिकं॥ ब्राह्मणादिभ्यः यत्। ब्राह्मण्यं। माणव्यं।
वाडव्यं। पृष्ठ्यः॥ ग्रामादिभ्यस्तल्। ग्रामता। जनता। बंधुता। गजता। सहायता। क्रतौ वाच्ये ६

अहन्छब्दात् खः। अहीनः॥ पर्शुशब्दात् अण्। पार्श्वं॥ अनुदात्तादेः खंडिकाशब्दात् च अञ्। कापोतं।
मायूरं। खांडिकं॥ चरणेभ्यो यत्। काठकं। छांदोग्यं॥ अचेतनात् हस्त्यादेश्च ठक्। साक्तुकं।
हास्तिकं। धैनुकं॥ केशात् यञ् ठक् अश्वात् छ अण् च। कैश्यं। कैशिकं। अश्वीयं। आ
श्वं। पाशादिभ्यः यः। पाश्या। तृण्या। धूम्या। वन्या। वात्या। खल्या। गव्या। रथ्या॥ खलादि
भ्यः इनिः। खलिनी। डाकिनी। कुटुंबिनी॥ गोः त्रः। गोत्रा॥ रथात् कट्यच्। रथकट्या॥ षष्ठ्यंतात् परिशी
लित देशार्थे अण्। शिबीनां विषयो देशः शैबः॥ राजन्यादिभ्यो वुञ्। राजन्यकः॥ भौरिक्या
दिभ्यः ऐषुकार्यादिभ्यश्च विधल् भक्तल् च। भौरिकिविधं। ऐषुकारिभक्तं। सारसायन
भक्तं॥ प्रथमांत छंदोवाचकात् स्वाद्यावयवक प्रगाथार्थे अण्। पंक्तिरादिर्यस्य सः पांक्तः प्र
गाथः॥ स्वार्थे ष्यण् क्वचित्। त्रिष्टुप् एव त्रैष्टुभं॥ प्रथमांत प्रयोजनवाचकात् स्वोद्देश्यके संग्रा
मे अण्। सुभद्रा प्रयोजनमस्य संग्रामस्य स सौभद्रः। सुभद्रोद्देश्यक संग्राम इत्यर्थः। भार
तः॥ प्रथमांत प्रहरणात् स्वप्रहरणक क्रीडायां णः। दंडः प्रहरणमस्यां क्रीडायां सा दांडा।
दंडप्रहरणजन्येत्यर्थः। मौष्टा। घञंत क्रियावाचकात् तदस्यां क्रियायामित्यर्थे ञः। श्येन

पातोस्यां क्रियायां सा द्यैनंपाता मृगया।तैलंपाता॥ द्वितीयां तादध्ययनकर्तरि ज्ञान
वति च अण्। व्याकरणं अधीते वेद वा वैयाकरणः॥ क्रतोः उक्थादेः अकल्यादिसूत्रांताच्च ठ
क्। आग्निष्टोमिकः। वाजपेयिकः। औक्थिकः। नैयायिकः। वार्तिकः। लौकायतिकः। सांग्र
हसूत्रिकः। वायसविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। पाराशरकल्पिकः॥ अंगा
देर्विद्यांतादाख्यातादेश्च अण्। आंगविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रैविद्यः। पौर्वविद्यः।
यावक्रीतिकः। वासवदत्तिकः। ऐतिहासिकः। पौराणिकः॥ सर्वादेः सादेश्च लुक्। सर्ववेदः। स
र्वतंत्रः। सवार्तिकः। द्वितंत्रः॥ पदोत्तरपदात् इकन्। पूर्वपदिकः। उत्तरपदिकः॥ शतात् षष्टे
श्च पथः षिकन्। शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी॥ क्रमादेर्वुन्। क्रमकः।
पदकः। शिक्षकः। मीमांसकः॥ अनुब्राह्मणात् इनिः। अनुब्राह्मणी॥ वसंतादेः ठक्। वासंति
कः। आथर्वणिकः॥ तेन प्रोक्तमित्यर्थे कप्रत्ययांतात् अध्ययनवेदनार्थकस्य प्रत्ययस्य लु
क्। पाणिनिना प्रोक्तं पाणिनीयं तदधीते वेद वा पाणिनीयः॥ ॥अथ चातुरर्थिकाः॥
प्रथमांतात् स्वाधिकरणदेशार्थे अण्। उदुंबराः संति अस्मिन् देशे स औदुंबरो नाम देशः॥ ६

तृतीयांतान्निर्वृत्ते अण्। कुशांबेन निर्वृत्ता कौशांबी नगरी॥ षष्ठ्यंतान्निवासे अण्।
शिबीनां निवासः शैबः॥ षष्ठ्यंताददूरभवे अण्। विदिशाया अदूरभवं वैदिशं नगरं॥ उका
रांतात् अञ्। कक्षतुना निर्वृत्तं कक्षतोः निवासः कक्षतोरदूरभवं वा काक्षतवं॥ बह्वक्षरा
न्मतुबंतात् अञ्। सैध्रकावतं॥ बह्वक्षरात् कूपे। दैर्घवरत्रः कूपः॥ संकलादेरञ्। सांकलं।
पौष्कलं॥ सौवीरादिषु स्त्रीषु। सौवीरा दात्तामित्री नगरी। साल्वा वैधूमाग्नी नगरी। प्राचीमा
कंदी नगरी॥ स्त्रवास्त्वादेः अण्। सौवास्तवं। वर्णु वार्णवं॥ रोणी शब्दात् तदंताच्च अण्। रौणः।
आजकरौणः॥ अंत्यसमीपककारघटितादण्। कार्णछिद्रकः। कार्कवाकवं। त्रैशंकवं॥
अरीहणाद्वुञ्। आरीहणकं॥ कृशाश्वात् छण्। कार्शाश्वीयं॥ ऋश्यात्कः। आर्श्यकं॥ कुमुदा
त् ठच्। कुमुदिकं॥ काशात् इलः। काशिलः॥ तृणात् सः। तृणसं॥ प्रेक्षादिनिः। प्रेक्षी॥ अश्मा
त् रः। अश्मरा॥ सखिशब्दात् ढञ्। साखेयं॥ संकाशात् ण्यः। सांकाश्यं॥ बलात् यः। बल्यः॥
पक्षात् फक्। पाक्षायणः॥ कर्णात् फिञ्। कार्णायनिः॥ सुतंगमादिञ्। सौतंगमिः॥ प्रगदिन्श
ब्दात् ञ्यः। प्रागद्यः॥ वराहात् कक्। वाराहकः॥ कुमुदात् ठक्। कौमुदिकः॥ देशे वाच्ये चातुरर्थि

कस्यलुप्।पंचालानांनिवासोजनपदःपंचालाः।।वरणादेश्चातुरर्थिकस्यलुप्।वरणानाम
दूरभवंवरणाः।।शार्कराशब्दात्ठक् छः ठच् कक् अण्लुपश्च।शार्करिकं।शार्करीयं।शार्क
रिकं।शार्करकं।शार्करं।शर्करा।।नद्यांवाच्यायांमतुप्।इक्षुमतीनदी।।मधोर्मतुप्।मधुमती।।
अपत्यादिचतुरर्थ्यंतेभ्योर्थेभ्योन्यस्मिन्नर्थेप्रथमादिविभक्त्यंतात्अण्प्रत्ययोभवति।उलू
खलेक्षुण्णः औलूखलोयावकः।अश्वैरूढः आश्वोरथः।चतुर्भिरूढंचातुरंशाकटं।।इतःप
रंयेप्रत्ययाः तेजातेभवेकृतेलब्धेकुशलेक्रीतेप्रायभवेसंभूतेदेयर्णेचार्थेसप्तम्यंतात्
भवंति।सोढमस्येत्यर्थेप्रथमांतात्इदमित्यर्थेषष्ठ्यंतात्।प्रोक्ते एकदिशि उपज्ञा-
तेकृतेग्रंथेचार्थेतृतीयांतात्।आगतइत्यस्मिन्नर्थेपंचम्यंतात्।राष्ट्रात्अवारपाराद्घस
प्तम्यंतात्खयौविगृहीताद्विपरीताच्च।राष्ट्रियः।अवारपारीणः।पारावारीणः।पारीणः।।अ
वारीणः।।ग्रामात्खञ्यौ।ग्रामेजातोभवोवाग्राम्यः।ग्रामीणः।।ढकञ्कत्र्यादिभ्यः।का
त्रेयकः।ग्रामेयकः।।कुलकुक्षिग्रीवाभ्यःढकञ् श्वनिअसौअलंकारेच।कौलेयकःश्वा।
कौक्षेयकःअसिः।ग्रैवेयकः अलंकारः।।ढक्नद्यादिभ्यः।नद्यांभवादिनादेयं।

माहेयं।वाराणसेयं।।दिव्प्राग्प्रतीग्भ्योयत्।दिविभवादिदिव्यं।प्राच्यं।प्रतीच्यं।।अमा
दिशब्देभ्यस्त्यप्।अमाभवादिअमात्यः।क्वत्यः।ततस्त्यः।तत्रत्यः।निर्गतोवर्णाश्रमेभ्यो
निष्ट्यः।ह्यःश्वोवाभवंजातंवाह्यस्त्यं।श्वस्त्यं।।आकारेणऐकारेणऔकारेणवाघटितंप्रथ
माक्षरंयस्यतद्वृद्धसंज्ञंतस्मात्पदादिभ्यश्चछः।शालायांभवःशालीयः।मालीयः।।ना
म्नश्छः अण्च।देवदत्तीयः।दैवदत्तः।तस्यअयंतदीयःभवदीयइत्यादि।।काश्यादिश
ब्देभ्यष्ठञ्।काशिकी।वैदिकी।।आपदादिपूर्वपदकालोत्तरपदात्ठञ्।आपत्कालिकी।।
उशीनरदेशेषुयेग्रामवाचकाःतेभ्यःवृद्धेभ्यः ष्ठञ्छश्च।सौदर्शनीयः।सौदर्शनिका।।दे
शोवाच्येउवर्णान्ताद्देशवाचकात्सप्तम्यंतात्ठञ्।नैषादकर्षुकः।दाक्षिकर्षुकः।।धन्ववाचका
त्उपान्त्ययकारकशब्दाच्चवृद्धात्देशवाचिनःवुञ्।ऐरावतकः।सांकाश्यकः।कांपिल्यकः।।
रेफोपधात्इकारांतात्चवृद्धात्प्राग्देशार्थकात्वुञ्।पाटलिपुत्रकः।काकंदकः।जनपदादे
शवाचकाद्वृद्धाद्वुञ्।आदर्शकः।त्रैगर्तकः।।कच्छाग्निवक्त्रगर्तोत्तरपदकेभ्योदेशवाचिभ्यो
वृद्धेभ्योवुञ्।दारुकच्छकः।कांडाग्नकः।सैंधुवक्त्रकः।।धूमादिभ्योदेशवाचिभ्योवुञ्।धौमकः।

 कुत्सन प्राबीण्यार्थे नगराद्वुञ्। नागरकः चौरः शिल्पी वा॥ अरण्यात् वुञ् पथ्यध्याय वि
 हारन्यायहस्तिमनुष्यात्मकार्थेषु। आरण्यकः॥ कुरुयुगंधराभ्यां षार्थे वुञ् अणञ्च। कौरवकः। कौरवः। यौ
गंधरकः॥ यौगंधरः। ककारोपान्त्यकात् अण्। माहिषिकः॥ देशवाचिभ्यः कच्छादिभ्योण्।
कच्छोदेशस्तत्रजातादिकाच्छः सैंधवः॥ मनुष्यमनुष्यस्थयोर्गम्यमानयोः त्तु वुञ्। काच्छ
कः मनुष्यः। काच्छकं हसितं॥ साल्वशब्दात् गोयवाग्वोः वुञ्। साल्वकोगौः। साल्विका यवा
गूः॥ गर्त्तशब्दोत्तरपदात् गहादिशब्देभ्यश्च छः। वृकगर्त्तीयं। गहीयः॥ जनपरदेवस्वशब्दे
भ्यश्छः तेषां कुक्च। जनकीयं। परकीयं। देवकीयं। स्वकीयं॥ वेणुकादिशब्देभ्यश्छण्।
वैणुकीयं। वैत्रकीयं। औत्तरपदकीयं॥ प्राग्देशवाचिनः कटाद्यावयवकेभ्यश्छप्रत्ययः।
कटनगरीयं। कटघोषीयं। कटपल्वलीयं॥ राजन्शब्दात् कः तस्मात् ईयः। राजकीयं॥ अक
इक एतदंतात् खोपान्त्यात् वृद्धात् देशवाचिनश्छः। ब्राह्मणकोनामजनपदोयत्र ब्राह्मणा
आयुधजीविनः तत्रजातो ब्राह्मणकीयः। शाल्मलिकीयः। आयोमुखीयं॥ पलदग्रामन
गरकंथाह्रद एतदुत्तरपदात् वृद्धात् देशवाचिनश्छः। दाक्षिपलदीयं। दाक्षिग्रामीयं। दाक्षिन 

गरीयं। दाक्षिकंथीयं। दाक्षिह्रदीयं॥ पर्वतशब्दात् समर्थ्यंतात् जातइत्यर्थे छः। पर्वतीयः॥ भारद्वा
जदेशवाचिभ्यां कृकणपर्णशब्दाभ्यां च छः। कृकणीयं॥ पर्णीयं। युष्मदस्मद्शब्दात् खः छ अण्
च। युष्मदीयः। अस्मदीयः। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः॥ एकार्थवाचि
नोर्युष्मदस्मदोस्तु। तावकीनः। मामकीनः। तावकः। मामकः। छेप्तु। त्वदीयः। मदीयः॥ अर्ध
शब्दात् परादिपूर्वादर्धशब्दाच्च यत्। अर्ध्यः। परार्ध्यं। अवरार्ध्यं। अधमार्ध्यं। उत्तमार्ध्यं। पू
र्वार्ध्यं॥ ग्रामजनपदेकदेशवाचिभ्यां दिक्पूर्वपदाभ्यां अर्धाताभ्यां अञ् ठञौस्तः। इमेअस्मा
कंग्रामस्यजनपदस्यवापौर्वार्ध्याः। पौर्वार्धिकाः॥ मध्यशब्दात् मप्रत्ययः। मध्यमः॥ उत्कर्षा
पकर्षहीनेअः प्रत्ययः। मध्योवैयाकरणः॥ समुद्रसमीपद्वीपशब्दात् यञ्। द्वैप्यं॥ स्त्रियां तु
द्वैप्या॥ कालवाचकशब्देभ्यष्ठञ्। मासिकं। सांवत्सरिकं। सायंप्रातिकः। पौनःपुनिकः॥
शरद्शब्दात् श्राद्धेठञ्। शारदिकं श्राद्धं॥ रोगातपयोः ठञ् अण् च। शारदिकः। शारदः॥
प्रदोषनिशाभ्यां ठञ् अण् च। नैशिकं। नैशं। प्रादोषिकं। प्रादोषं॥ श्वस्शब्दात् ठञ् तस्य
तुट्। शौवस्तिकं॥ संधिवेलादिभ्यः नक्षत्रेभ्यः ऋतुभ्यश्च अण्। संधिवेलायांभवं सां

धिवेलं। सांध्यं। आमावास्यं। त्रायोदशं। चातुर्दशं। पांचदशं। पौर्णमासं। प्रातिपदं।
ग्रैष्मं। तेषां॥ संवत्सरशब्दात्फलपर्वणोरर्थयोरण्। सांवत्सरं फलं पर्व वा॥ प्रावृट्शब्दा
त् एण्यप्रत्ययः। प्रावृषेण्यः॥ वर्षाशब्दात् ठक्। वार्षिकं वासः॥ हेमंतशब्दात् अण् तलो
पश्च। हैमंतं। हैमनं॥ सायमित्यादिशब्देभ्यः कालवाचिभ्यः अव्ययेभ्यश्च ट्युः तस्य तुट् च।
सायंतनं। चिरंतनं। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं॥ परारि चिर परुत् शब्देभ्यः त्नः।
परारित्नं। चिरत्नं। परुत्नं॥ अग्रादिपश्चिमांतेभ्य इमच्। अग्रिमं। आदिमं। पश्चिमं। अं
तिमं॥ अपराह्ण पूर्वाह्णाभ्यां तनः ठञ् च। पूर्वाह्णेतनं। अपराह्णेतनं। पौर्वाह्णिकं। आपराह्णिकं॥
सप्तम्यंतात् जात इत्यर्थे अणादयः स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण
इत्यादि॥ प्रावृट्शब्दात् ठप्। प्रावृषिकः॥ क्वचिदुत्तरपदवृद्धिः। पूर्ववार्षिकः। अपरहैमनः।
सुपांचालकः। अर्धपांचालकः। पूर्वपांचालकः। पूर्वैषुकामशमः॥ पूर्वाह्णादेर्वुन्। पूर्वा
ह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः। पथकः। अमावास्या
या वुन् अण् अश्च। अमावास्यकः। अमावास्यः॥ जातप्रत्ययस्य क्वचिल्लुक्। आषाढासु

जातः अषाढः। श्रविष्ठः। फल्गुनः। अनुराधः इत्यादि॥ सप्तम्यंतात् प्रायभव इत्यर्थे अण्। स्रुघ्ने प्रायेण बाहुल्येन भवः
स्रौघ्नः॥ उपजान्वुपकर्णोपनीवेष्ठक्। औपजानुकः। औपकर्णिक इत्यादि॥ सप्तम्यंतात्
संभूत इत्यर्थे अणादि। स्रुघ्ने संभूतः स्रौघ्नः॥ ढञ् कोशात्। कौशेयं वस्त्रं॥ कालवाचका
त् साध्वर्थे पुष्प्यंतीत्यर्थे पच्यमानेऽर्थे च अण्। हेमंते साधुः हैमंतः। वसंते पुष्प्यंतीति वासंत्यः
कुंदलताः। शरदि पच्यंते शारदाः शालयः॥ सप्तम्यंतात् उप्तार्थे अणादयः। हेमंते उप्यं
ते हैमंताः यवाः। हैमनाः॥ कालवाचकात् देयमृणार्थे अण्। मासे देयं मासिकं॥ अवरसमग्री
ष्माभ्यां वुञ्। आवरसमकं। ग्रैष्मकं॥ आग्रहायणीसंवत्सराभ्यां ठञ् वुञ् च। आग्रहायणि
कं। आग्रहायणकं। सांवत्सरिकं। सांवत्सरकं॥ कालवाचिनः सप्तम्यंतात् व्याहरण क
र्तरि मृगे अण्। निशायां व्याहरति नैशो मृगः। नैशिकः॥ प्रथमांतात् अस्य सोढमित्यर्थे ठ
ञ् वुञ् च। निशा सोढास्य नैशिको वा मृगः॥ सप्तम्यंतात् भवार्थे अणादयः। स्रुघ्ने भवः स्रौ
घ्नः। राष्ट्रियः॥ दिगादिशब्देभ्यो यत्। दिश्यं। वर्ग्यं॥ शरीरावयववाचकात् यत्। दंत्यं। कंठ्यं॥
अहि कुक्षि दृति कलशि वस्तिभ्यो ढञ्। आहेयं। कौक्षेयं। दार्तेयं। कालशेयं। वास्तेयं॥ ग्री

वाशब्दादण्ढञौ।ग्रैवं।ग्रैवेयं॥गंभीरशब्दात्पंचजनशब्दादव्ययीभावाच्च ञ्यः।गांभीर्यं।
पांचजन्यः।पारिमुख्यं॥अंतःपूर्वपदात् अव्ययीभावात् ठञ्।वेश्मनि अंतः अंतर्वेश्मन
त्र भवं आंतर्वेश्मिकं।आंतर्गणिकं॥अध्यात्मादिभ्य ष्ठञ्।आध्यात्मिकं॥अनुशतिकादी
नां उभयपदवृद्धिर्भवति।आधिदैविकं।आधिभौतिकं॥शिंशपादित्यवाट् दीर्घसत्रदेवि
काश्रेयसां पंचानां आदेरचः आकारो भवति ञितिणितिच किति।शांशपः।दात्यौहं।दार्घ
सत्रं।दाविकं।श्रायसं॥अंगुलेः जिह्वामूलात्वर्गांतेभ्यश्छः।अंगुलीयं।जिह्वामूलीयं।क
वर्गीयं॥शब्दभिन्ने वाच्येतुयत्खछाः।मद्वर्ग्यः।मद्वर्गीणः।मद्वर्गीयः॥अलंकारे वाच्ये
ललाटकर्णाभ्यां कन्।ललाटिका।कर्णिका॥व्याख्येयनाम्नः षष्ठ्यंतात्व्याख्यानार्थे अण्।
सुपां व्याख्यानः सौपो ग्रंथः॥यज्ञवाचकात् ठञ्।अग्निष्टोमस्यव्याख्यानः तत्रभवो वा आ
ग्निष्टोमिकः।वाजपेयिकः।पाकयज्ञिकः।नावयज्ञिकः॥छंदस्शब्दात् अण्यतौ।छंदस्यः।
छांदसः॥ऋकारांत प्रथमाध्वरद्व्यक्षरब्राह्मणर्क्पुरश्चरणनामाख्यातेभ्य ष्ठक्।चातुर्हौत्
कः।प्राथमिकः।आध्वरिकः।ऐष्टिकः।ब्राह्मणिकः।आर्चिकइत्यादि॥ऋगयनादिभ्यःअ

ण्।आर्गयनः।औपनिषदः।वैयाकरणः॥पंचम्यंतात् आगतइत्यर्थे अणादयः।स्रुघ्नादाग
तः स्रौघ्नः॥विद्यासंबंधयोनिसंबंधवाचकाभ्यां वुञ्।औपाध्यायकः।पैतामहकः॥ऋवर्णां
तात् ठञ्।हौतृकं।मातृकं।भ्रातृकं॥पितृशब्दात्तु यदपि भवति।पित्र्यं।पैतृकं॥नञ्पूर्वका
णां शुचिक्षेत्रज्ञकुशलनिपुणेश्वराणां आद्यचो वृद्धिः नञ आकारो वा।आशौचं।अशौचं।
आकौशलं।अकौशलं॥हेतुवाचकात् रूप्यश्छो वा।समादागतं समरूप्यं।समीयं।विषम
रूप्यं।विषमीयं॥मनुष्यवाचकात् रूप्योण्वा।देवदत्तरूप्यं।दैवदत्तं॥एभ्यो मयट्च।सम
मयं।विषममयमित्यादि॥पंचम्यंतात्प्रभवतीत्यर्थे अणादयः।हैमवती गंगा॥द्वितीयांताभ्यां गच्छतिदूतः
पंथा वेत्यर्थे।स्रुघ्नं गच्छति स्रौघ्नः पंथाः दूतो वा॥द्वितीयांतादभिनिष्क्रमणकर्तरि द्वारे।स्रुघ्नमभिनिष्क्रामति स्रौघ्नं
कुरुद्वारं॥द्वितीयांतात् अधिकृत्य कृतग्रंथ इत्यर्थे अणादयः।शारीरकं अधिकृत्य कृतो
ग्रंथः शारीरकीयः॥प्रथमांतात् निवास अभिजनो वा अस्येत्यर्थे अणादयः।स्रुघ्नः निवा
सः अभिजनो वा अस्य स्रौघ्नः।अभिजनः पूर्वैरुषितः॥प्रथमांतात् भक्तिरस्येत्यर्थे।स्रु
घ्नो भक्तिरस्य स्रौघ्नः।भज्यत इति भक्तिः॥चित्तदेशकालभिन्नवाचकात् भक्तिरस्येत्यर्थे ठक्।आ

पूपिकः।पायसिकः।ठक् महाराजात्।माहाराजिकः॥अर्जुनवासुदेवाभ्यांवुन्।अर्जुनकः।वासुदेवकः॥तृतीयांतात्प्रोक्तेइत्यर्थेअणादयः।पाणिनिनाप्रोक्तंपाणिनीयं।तित्तिरिखंडिकोखवरतंतुभ्यश्छण्।ततश्चनित्यंअध्येतरिज्ञातरिचप्रत्ययः।तैत्तिरिणाप्रोक्तमधीयतेतैत्तिरीयाः।खांडिकीयाः।औखीयाः।वरतंतवीयाः॥तृतीयांतादेकदिशि।सुदाम्नाद्रिणाएकदिक्सौदामनी॥तसिः।पीलुमूलेनैकदिक्पीलुमूलतः॥उरसोतसिर्यश्च।उरसाएकदिक्उरस्यः।उरस्तः॥तृतीयांतादुपज्ञातेकृतग्रंथेचअणादयः।पाणिनिनाउपज्ञातःकृतग्रंथोवापाणिनीयः॥तृतीयांतात्कृतेसंज्ञायां।मक्षिकाभिःकृतंमाक्षिकंमधु॥वुञ्संज्ञायांकुलालादिभ्यः।कौलालकं।वारुडकं।भ्रमरवटरक्षुद्रपादपेभ्यःसंज्ञायामञ्।क्षौद्रं।भ्रामरं।वाटरं।पादपं॥षष्ठ्यंतादिदमर्थेअणादयः।उपगोरिदमौपगवं॥अग्नीधस्तुस्थानेरण्।अग्नीधःस्थानंआग्नीध्रं॥यत्रथात्।रथ्यं॥वाहनपूर्वादञ्।आश्वरथं॥सीरहलाभ्यांठक्।सैरिकं।हालिकं॥छःरैवतादिभ्यः।रैवतिकीयः।बैजवापीयः॥हास्तिपदकौपिंजलाभ्यामण्।हास्तिपदः।कौपिंजलः॥ ॥इतिशैषिकाःसमाप्ताः॥षष्ठ्यंताद्विकारार्थे ५

अणादयः।अश्मनोविकारःआश्मः।आश्मनः॥वृक्षप्राण्योषधिभ्यस्तुअवयवेविकारेच।मयूरस्यावयवोविकारोवामायूरः।मौर्वंकांडंभस्मवा॥अञ्बिल्वादिभ्यः।बैल्वः॥उपांत्यककारघटितादण्।तार्कवं।तैत्तिडीकं॥त्रपुजतुनोरण्षुक्च।त्रापुषं।जातुषं॥उवर्णांतादञ्पलाशादिभ्यश्चवा।दैवदारवं।भाद्रदारवं।पालाशं।कारीरं।खादिरं॥वुञ्शम्याः।शामीलंभस्म॥प्रकृतिमात्रात्भक्ष्याच्छादनभिन्नयोर्विकारावयवयोर्मयड्वा।अश्ममयं।आश्मनं।आम्रमयं।दारमयं।त्वङ्मयं।वाङ्मयं॥गोशब्दात्पुरीषे।गोमयं॥तिलयवाभ्यांच।तिलमयं।यवमयं।संज्ञायांत्वण्।तैलं।यावकः॥अण्तालादिभ्यः।तालं।सुवर्णवाचकादण्परिमाणेवाच्ये।हाटकः।तापनीयः।सौवर्णोवा॥रजतादिभ्यःप्राणिवाचकाच्चाञ्।राजतं।शौकं।बाकं॥परिमाणवाचकात्कौ।तार्थेयेप्रत्ययास्तेविकारेपितस्माद्भवंति।नैष्किकं॥उष्ट्रशब्दात्वुञ्।औष्ट्रकं॥उमोर्णाभ्यांवुञ्।औमकं।और्णकं॥एकाचमादणञो।औमं।और्णं॥एणीशब्दात्ढञ्।ऐणेयं॥गोःपयसःद्रोश्चयत्।गव्यं।पयस्यं।द्रव्यं॥मानेगम्यमानेवयःप्रत्ययः।द्रुवयं॥फलेवाच्येविकारावयवप्रत्ययस्यलोपः।आमलकं॥अण्प्लक्षादिभ्यः।प्लाक्षं।नैयग्रोधं॥जंबूशब्दात्फलेवाच्येअ

प्यवालोपः।जांबवं।जंबु॥ विकारावयवप्रत्ययस्य पुष्पमूलयोरर्थयोः क्वचिल्लोपः।मल्लिकायाः
पुष्पंमल्लिका।जातिः।जाती।विदार्याःमूलंविदारी।अशोकं।करवीरं।इतिप्राग्दीव्यतीयाः
अणादयःसमाप्ताः॥ ॥अथवहतिघटिनमृत्रास्याकूये अर्थाःतेषुठक्।माशब्दादिभ्यः
ठक्।माशब्दःकारीइत्याहसःमाशब्दिकः।स्वागतमाहस्वागतिकः॥द्वितीयांतेभ्यःप्रभूतादि
भ्यःआहेत्यर्थे।प्राभूतिकः।पार्याप्तिकः॥सुस्नातादिभ्यःपृच्छतीत्यर्थेसौस्नातिकः।सौखशाय
निकः॥परदारादिभ्यःगच्छतीत्यर्थे।पारदारिकः।गौरुतल्पिकः॥तृतीयांतात्खनतिदीव्य
तिजयतिजितमित्यर्थेषु।अक्षैर्दीव्यतिआक्षिकः।अभ्याखनतिआभ्रिकः।अक्षैर्जयतिआ
क्षिकः।अक्षैर्जितंआक्षिकं॥तृतीयांतात्संस्कृतार्थे।दध्नासंस्कृतंदाधिकं।मारीचिकं॥कुल
त्थात्ककारोपांत्यात्संस्कृतेअण्।कुलत्थैःसंस्कृतंकौलत्थं।तैत्तिडीकं॥तरतीत्यर्थे।उडुपे
नतरतिऔडुपिकः॥ठञ्गोपुच्छात्।गौपुच्छिकः॥नौशब्दात्द्व्यक्षराच्चठन्।नाविकः।घटिकः।
बाहुभ्यांतरतिबाहुकास्त्री।।गच्छतीत्यर्थे भक्षयतीत्यर्थेचठक्।हस्तिनागच्छतिहास्तिकः।
दध्नाभक्षयतिदाधिकः॥ष्ठन्पर्पादिभ्यः।पर्पेणचरतिपर्पिकः।अश्विकः।रथिकः॥ठञ्श्वगणा ७०

त्।श्वागणिकः॥वेतनादिभ्यःजीवनीत्यर्थेठक्।वैतनिकः।धानुष्कः॥क्रयविक्रयवस्नशब्दे
भ्यष्ठन्।क्रयिकः।विक्रयिकः।क्रयविक्रयिकः।वस्निकः।वस्नंद्रव्यं॥उत्संगादिशब्देभ्यःहर
तीत्यर्थे।उत्संगेनहरतिऔत्संगिकः॥ष्ठन्भस्त्रादिभ्यः।भस्त्रयाहरतिभस्त्रिकः॥विवधात्
ष्ठन्ठक्च।विवधेनहरतिविवधिकः।वैवधिकः॥अक्षद्यूतादिशब्देभ्यःनिर्वृत्तार्थे।अक्षद्यू
तेननिर्वृत्तंआक्षद्यूतिकंवैरं॥क्त्रिप्रत्ययांतशब्दान्नित्यंमप्प्रत्ययः।पक्त्रिमं।कृत्रिमं॥भा
वप्रत्ययांतादिमप्वक्तव्यः।पाकिमं।त्यागिमं।अपमित्येतिल्यबंतंअव्ययं। तस्मात्याचित
शब्दात्कक्ठनौभवतः।याचितकं।अपमित्यनिर्वृत्तंआपमित्यकं।याचितेननिर्वृत्तंयाचितकं॥
संसृष्टार्थे।दध्नासंसृष्टंदाधिकं॥इनिश्चूर्णात् । चूर्णैःसंसृष्टाःचूर्णिनोपूपाः॥लुक्लवणा
त्।लवणेनमिलितोलवणः॥अण्मुद्गात्।मुद्गैर्मिश्रितःमौद्गः॥व्यंजनवाचकेभ्यःउपसि
क्ते।दध्नोपसिक्तंदाधिकं। ताक्रिकं॥सहसादिशब्देभ्यःवर्ततइत्यस्मिन्नर्थे।सहसावर्तते
साहसिकःचौरः। अंभसावर्ततेआंभसिकोमत्स्यः। औजसिकःचौरः॥ ॥अथद्विती
यांतात्प्रत्ययाः॥प्रतीपादिशब्देभ्यःवर्ततइत्यर्थे।प्रतीपंवर्ततेप्रातीपिकः।प्रतिकूलंवर्तते

प्रातिकूलिकः आनुकूलिकः। पारिमुखिकः। पारिपार्श्विकः॥ गर्ह्यंप्रयच्छतीत्यर्थे। द्विगुणंप्र
यच्छतिद्वैगुणिकः। वृद्धिंप्रयच्छतिवार्धुषिकः॥ दशैकादशादिशब्देभ्यः ष्ठन्ष्ठचौ। दशैकादशान्
प्रयच्छतिदशैकादशिकः। कुसीदिकः॥ उंछतिरक्षतीत्यर्थयोः। बदराण्युंछतिबादरिकः। समा
जंरक्षतिसामाजिकः॥ शब्ददर्दुराभ्यां करोतीत्यर्थे। शब्दंकरोतिशाब्दिकः। दार्दुरिकः। पक्षि
मृगवाचकेभ्यःहंतीत्यर्थे। पक्षिणंहंतिपाक्षिकः। शाकुनिकः। मत्स्यंहंतिमात्स्यिकः। मैनिकः।
मृगान्हंतिमार्गिकः। हारिणिकः। सारंगिकः॥ परिपंथशब्दात्हंतितिष्ठतिचेत्यर्थयोः। परि
पंथंतिष्ठतिहंतिवापारिपंथिकश्चोरः॥ माथोत्तरपदकादिभ्यः धावत्यर्थे। दंडमाथंधावति
दांडमाथिकः। पदवींधावतिपादविकः। आनुपदिकः॥ पदोत्तरपदकात्प्रतिकंठादेश्च गृह्णा
तीत्यर्थे। पूर्वपदंगृह्णातिपौर्वपदिकः। औत्तरपदिकः। प्रातिकंठिकः। आर्थिकः। लालामि
कः॥ धर्माधर्माभ्यांचरतीत्यर्थे। धर्मंचरतिधार्मिकः। आधार्मिकः॥ प्रतिपथादेतीत्यर्थे ठक्
ठन्च। प्रतिपथमेतिप्रातिपथिकः। प्रतिपथिकः॥ समवायादिभ्यः समवैतीत्यर्थे। समवाया
न्समवैतिसामवायिकः। सामूहिकः॥ ण्यः परिषदः। पारिषद्यः॥ सेनायाः ठक्ण्यश्च।

सैनिकः। सैन्यः॥ धर्माद्नपेताधर्म्यस्तस्मिन्नर्थेषष्ठ्यंतात्। आपणस्यधर्म्यआपणिकः॥
महिष्यादिरूदंतेभ्यश्चक्रमादणञौ। माहिषं। याजमानं। यातुर्धर्म्यंयात्रं। नारी। विशसि
तुर्धर्म्यंवैशस्त्रं। एवंवैभाजित्रं॥ षष्ठ्यंतात्अवक्रये। अवक्रयोराजग्राह्यंद्रव्यं। आपणस्य अ
वक्रयः आपणिकं॥ अथप्रथमांत् अस्यपण्यमित्यर्थे। अपूपाःपण्यमस्यआपूपिकः। लावणि
कः॥ सुगंधिद्रव्यविशेषवाचिभ्यः किसरादिशब्देभ्यःठन्। किसरिकः। उशिरिकः। नलदिकः।
शलालुशब्दात्ठक्ठनौ। शालालुकः। शलालुकः॥ अस्यशिल्पमित्यर्थे। मृदंगःशिल्पमस्य
मार्दंगिकः॥ अस्यायुधमित्यर्थे। असिप्रहरणमस्यआसिकः। धानुष्कः। खड्गिकः। तौमरिकः।
पाट्टीशिकः। मौसलिकः। पारश्वधिकः॥ शक्तियष्टिभ्यांईकक्। शाक्तीकः। याष्टीकः। अस्य
मतिरित्यर्थेअस्त्यादिभ्यः। अस्तीतिमतिरस्यआस्तिकः। नास्तिकः। दैष्टिकः॥ अस्यशील
मित्यर्थे। अपूपाःशीलमस्यआपूपिकः॥ णः छत्रादिभ्यः। गुरोर्दोषाणामावरणंछत्रंछत्रं
शीलमस्यछात्रः। तापसः। चुरास्वभावोस्यचौरं। कर्मस्वभावोस्यकार्मः॥ अध्ययनेवृत्तंय
त्कर्मतदर्थे। एकमन्यद्वृत्तंअस्यऐकान्यिकः॥ हितंभक्षार्थे। अपूपाःहितंभक्षाअस्मैआपू

पिकः। भाक्तः। भाक्तिकः॥ अथसप्तम्यंतात् नियुक्ते। देवागारे नियुक्तोदेवागारिकः॥ नि
षिद्धकालदेशात् अध्येतरि। चतुर्दश्यामधीते चातुर्दशिकः। अमावास्यायामधीतेआमा
वास्यिकः। अष्टम्यांअधीते आष्टमिकः। त्रयोदश्यां व्याकरणमधीते त्रायोदशिकः। श्मशा
नेअधीते श्माशानिकः॥ निकटशब्दात् स्थितइत्यर्थे। निकटेस्थितो नैकटिको भिक्षुः॥ ष्ठ
लआवसथात्। आवसथिकः॥ इतिठकोवधिः समाप्तः॥ ॥अथ हितार्थाख्याधीनेषर्थे
ष्वयत्प्रत्ययः। द्वितीयांतात् रथयुगप्रासंगेभ्यः। रथंवहति रथ्यः। युग्यः॥ वत्सानांदमनका
ले स्कंधे काष्ठमासज्यते स प्रासंगः। तंवहति प्रासंग्यः॥ धुरूशब्दात् यड्ढकौ। धुर्यः। धौरेयः॥
सर्वधुरात्खः। सर्वधुरीणः॥ अण् शकटात्। शाकटः॥ सीरहलाभ्यां ठक्। सैरिकः। हालिकः॥
विध्यतीत्यर्थे अधनुषि। पादौविध्यंति पद्याः शर्कराः॥ गणधनाभ्यां लब्धरि। गणंलब्धागा
ण्यः। धन्यः॥ णः अन्नात्। आन्नः॥ वशाङ्गते। वश्यः॥ पदात् दृश्यमस्मिन्नित्यर्थे। पद्यः कर्द
मः॥ मूलात् उत्पाटितमस्येत्यर्थे। मूलमुत्पाटितमस्य मूल्यः॥ अथ तृतीयांतात् गृह
पतेः संयुक्तेऽर्थे ञः। गार्हपत्यः॥ नावस्तार्ये। नाव्यं। वयसस्तुल्ये। वयस्यः। धर्मात्प्राप्ये।

धर्म्यं॥ विषात् वध्ये। विष्यः॥ मूलादानाम्यसमयोः। मूल्यः॥ सीतायाः समिते। सीत्यं॥ तु
लायाः संमिते। तुल्यं॥ छंदसः निर्मितेत्यर्थे। छंदस्यं॥ उरसोण्यतौ। औरसः। उरस्यः॥
अथषष्ठ्यंतात्। हृदयात् प्रिये आर्षबंधने च। हृदयस्यप्रियः आर्षबंधनंवा हृद्यः मित्रः
मंत्रोवा॥ मतात्करणे। मत्यः॥ जनात् जल्पे। जन्यः॥ हलात्कर्षे। हल्यः॥ अथसप्तम्यंतात्
साधौ। अग्रेसाधुरग्र्यः। सामसुसाधुः सामन्यः॥ खञ् प्रतिजनादिभ्यः। प्रातिजनीनः। सां
युगीनः॥ णो भक्तात्। भाक्तः शालयः॥ ठक् कथादिभ्यः। काथिकः॥ ठञ् गुडादिभ्यः।
गौडिकः। साक्तुकः॥ पथ्यादिभ्यो ढञ्। पाथेयं। आतिथेयं। वासतेयं। स्वापतेयंधनं॥
यः सभायाः। सभ्यः। अथवसतीत्यर्थे सतीर्थात्। स तीर्थे वसति सतीर्थ्यः। सतीर्थेस
मानगुरुः॥ सोदरसमानोदराभ्यां शयिते। सोदर्यः। समानोदर्यः॥ यत् समाप्तः॥
अथछः॥ गवादिभ्यः उवर्णांतेभ्यश्च नाभेः शुनः ऊधसश्च यत्। हविरपूपादिभ्यश्च यत्
छौ। अथचतुर्थ्यंतात् हिते। वत्सेभ्यो हितो वत्सीयः। गव्यं। शंकव्यं। नाभ्यं। नभ्यं। शुन्यं। शु
न्यं। ऊधस्यं। आमिक्ष्यं। आमिक्षीयं। अपूप्यं। अपूपीयं॥ यत् शरीरावयवात्। दंत्यं। कंठ्यं।

नस्यं। शीर्षण्यं। शिरस्यं॥खलादिभ्यश्च। खल्यं। यव्यं। माष्यं। तिल्यं। वृष्यं। ब्रह्मण्यं॥ थ्यन्
अजाविभ्यां। अजथ्या। अविथ्या॥आत्मन: विश्वजनात् पंचजनात् भोगोत्तरपदकाच्च ख:।
आत्मनीनं। विश्वजनीनं। पंचजनीनं। राजभोगिन:॥सर्वजनात् ठञ् खौ। सार्वजनिक:। सर्वज
नीन:॥चरकमाणवाभ्यां खञ्। चारकीनं। माणवीनं।॥अथषष्ठ्यंताद्विकृतिवाचकात् तदर्थेप्र
कृतौ। अंगारेभ्य: प्रकृतीनि आंगारीयाणि काष्ठानि। प्राकारीया: इष्टका:॥ढञ् छदिष:
बलेश्च। छादिषेयं। बालेयं॥ ऋषभोपानह्भ्यांञ्य:। आर्षभ्य: औपानह्य:॥ अञ् चर्मरूपवाच
कात्। वारत्रं॥ ढञ् परिखाया:। पारिखेयी। इतिछ:गवादिभ्योयत्त्वसमाप्तौ॥ ॥अ
थतुल्यार्थात्प्राचीनार्थेषु ठञ्। तत्र अर्हार्थात्प्राचीनार्थेषु गोपुछसंख्यापरिमाणवाचकभि
न्नेभ्य: असमासस्थनिष्कादिभ्यश्च ठक्। शतभिन्नार्थकात् शतान्तात् ठन्। त्यंतभिन्नात् श
दंतभिन्नाच्च संख्यावाचकात् कन्। डुन् विंशतित्रिंशद्भ्यां। टिठन् कंसात्। शूर्पादञ् ठञौ।
विंशतिकंसहस्रवसनशतमानेभ्योण्॥अथाध्यर्धपूर्वकेभ्य: विंशतिकांतात् द्विगोश्च ख:।
खारीशब्दात् केवलाच्च ईकन्। पादमाषपणशतात् यत्। शाणशब्दात् यत् लुक्च। अथद्वि ७

त्रिपूर्वात् शाणशब्दात् यत् अण् च। तृतीयांतात् क्रीतार्थे उक्तप्रत्यया:। गोपुछेन क्रीतं गोपु
छिकं। नैष्किकं। शतेन क्रीतं शातिकं। शत्यं। पंचक:। बहुक:। विंशक:। त्रिंशक:। कंसिक:।
शौर्प। शौर्पिकं। वैंशतिकं। साहस्रं। वासनं। अध्यर्धविंशतिकीनं। द्विविंशतिकीनं। अध्य
र्धखारीकं। खारीकं। अध्यर्धपाद्यं। अध्यर्धमाष्यं। अध्यर्धपण्यं। अध्यर्धशत्यं। अध्यर्धशा
ण्यं। द्विशाण्यं। द्वैशाणं। त्रिशाण्यं। त्रैशाणं॥षष्ठ्यंतात् निमित्त यो: संयोगोत्पातयो:
ठञ्। शतस्य निमित्तं शत्यं। शातिकं। निमित्तं भावुकं शुभाशुभसूचकं वा॥ पुत्रान् यत् छौ।
पुत्र्य:। पुत्रीय:॥ पृथिवी सर्वभूमिभ्यामणञौ। पार्थिव:। पार्थिवी। सार्वभौम:॥षष्ठ्यंतात्
ईश्वरेर्थे सप्तम्यंतात् विदितार्थे च अण्। सर्वभूमे: ईश्वर: सर्वभूमौ विदितो वा सार्वभौम:।
सर्वलोकात् लोकाच्च ठञ्। सार्वलौकिक:। लौकिक:॥ षष्ठ्यंतात् वाप इत्यर्थे ठञ्। प्रस्थस्य
वाप: प्रास्थिकं क्षेत्रं॥ पात्रशब्दात् ठन्। पात्रिकं॥ प्रथमांतात् अस्मिन् अस्मै वा वृद्धि: आय:
लाभ: शुल्कं उपदा वा दीयते इत्यर्थे। पंचास्मिन् अस्मै वा वृद्ध्यादिर्दीयते पंचक:। शतिक:।
शत्य:। साहस्र:॥ पूरणप्रत्ययांतात् अधानि च कन्। द्वितीयो वृद्ध्यादिरस्मिन्

दीयते द्वितीयकः। अर्धिकः॥ यठन् भागात्। भागो दध्यादिरस्मिन् दीयते भाग्यः। भागि
कः॥ द्वितीयांताद्वंशादिपूर्वकात् भारशब्दादावहति हरति वहति इत्यर्थे। वंशभारं वहति
आवहति हरतीति वा वांशभारिकः। ऐक्षुभारिकः॥ द्रव्यवस्नाभ्यां कन्ठनौ। द्रव्यकः। वस्न
कः॥ पचति संभवति अवहरतीत्यर्थे प्रास्थिकः॥ द्रोणात्पचतीत्यर्थे अण्ठञौ॥ द्रौणी।
द्रौणिकी॥ पात्राढकाचितात् खठञो। पात्रं संभवति अवहरति पचति वा पात्रीणा। आ
ढकीना। आचितीना॥ संख्यापूर्वकात् लुक्खः। द्विपात्रिकी। द्विपात्रीणा। द्व्याढकिकी। द्व्याढकीना। द्व्याचिति
की। द्व्याचितीना॥ प्रथमांताद्भागिनि मूल्यं वृत्तिर्वेतनं वृत्तिर्वार्थे। पंचभागादिरस्य पंचकः॥ परिमाणवाति। प्रस्थप
रिमाणमस्य प्रास्थिको राशिः॥ संख्याया नकारसंज्ञायां संघे सूत्रे अध्ययने च परिमाणिषु। पंचक इत्या
दि। स्तोमे परिमाणिनि डः॥ पंचदश परिमाणमस्य स्तोमस्य पंचदशः॥ द्वितीयां
तात् अर्हतीत्यर्थे। श्वेतछत्रमर्हति श्वैतछत्रिकः॥ छेदादिभ्यो नित्यमर्हतीत्यर्थे। छेदं नित्यं
अर्हति छैदिकः। वैतसः। विरागं नित्यमर्हति वैरंगिकः॥ शीर्षछेदात् ठकृयतौ। शीर्षछेद
माभीक्ष्ण्यमर्हतीति शीर्षछेद्यः। शैर्षछेदिकः॥ दंडादिभ्यो अर्हतीत्यर्थे यत्। दंडमर्हति दंड्यः। ७६

अर्घ्यः। वध्यः॥ पात्रशब्दात् यन् घो। पात्रमर्हति पात्र्यः। पात्रियः॥ कडंकरदक्षिणाभ्यां स्थाली
बिलाच्च छयतौ। कडंकरमर्हति कडंकरीयः। कडंकर्यः। दक्षिणीयः। दक्षिण्यः। स्थालीबिली
यः। स्थालीबिल्यः। अर्हपर्यंतार्थेषु प्रत्ययानामवधिः पूर्णः॥ ॥अतः परं ठञेव। द्वितीयांते
भ्यः पारायणादिभ्यः वर्तयतीत्यर्थे। पारायणं वर्तयति पारायणिकश्छात्रः। तौरायणिकः। चां
द्रायणिकः॥ संशयादापन्ने। सांशयिकः॥ योजनादिभ्यः गच्छतीत्यर्थे। योजनं गच्छति योजनिकः।
क्रोशशतिकः। योजनशतिकः॥ पथिशब्दात् गच्छतीत्यर्थे कन्। पंथानं गच्छति पथिकः॥ नि
त्यं गच्छतीत्यर्थे अण्। पंथानं नित्यं गच्छति पांथः॥ तृतीयांतेभ्यः उत्तरपथादिभ्यः आहृते। उत्त
रपथेनाहृतमौत्तरपथिकं। वारिपथिकं। जांगलपथिकं। स्थालपथिकं। कांतारपथिकं॥ अथ
कालवाचकेभ्यः प्रत्ययाः॥ तृतीयांतात् निर्वृत्ते। अह्ना निर्वृत्तमाह्निकं॥ द्वितीयांतात् अधीष्टे भृ
ते भूते भाविनि च। मासं अधीष्टः भृतः भूतः भावी वा मासिकः॥ मासात् वयसि वाच्ये यत् खञौ।
मासं भूतो मास्यः। मासीनः॥ यप् द्विगोः। द्विमास्यः॥ षण्मासात् वयसि वाच्ये ण्यत् ठञौ। षाण्
मास्यः। षाण्मासिकः॥ समाशब्दात् खः। समीनः॥ समांतात् द्विगोः खठञौ। द्विसमीनः। द्वैस

मिकः। रात्र्याद्यंताद्विगोश्च। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। द्विसंवत्सरीणः। द्वैसंवत्सरिकः। द्विवार्षिकः। द्वैवर्षिकः॥ तृतीयांतात् षष्टिशब्दात् पच्यंते इत्यर्थे कन्। षष्टिरात्रेण पच्यंते षष्टिकाः॥ परिजय्ये कार्ये सुकरे लभ्ये चार्थे। मासेन परिजय्यं लभ्यं कार्यं सुकरं वा मासिकं॥ द्वितीयांतात् ब्रह्मचर्यं वर्तते। मासं ब्रह्मचर्यमस्य मासिकः। आर्धमासिकः॥ यज्ञवाचकात् षष्ठ्यंतात् दक्षिणायां। द्वादशाहस्य दक्षिणा द्वादशाहिकी। आग्निष्टोमिकी॥ सप्तम्यंतात् दीयत इत्यर्थे कार्यार्थे च भवार्थे वत्प्रत्ययाः। प्रावृषि दीयते कार्यं वा प्रावृषेण्यं। शारदं॥ इति कालवाचकेभ्यः प्रत्ययाः समाप्ताः॥ ॥अण् व्युष्टादिभ्यः। व्युष्टे दीयते कार्यं वा वैयुष्टं। सांग्रामं। प्रावासं इत्यादि॥ तृतीयांतात् हस्ताद्यथाकथाशब्दात् चयत् णौ। हस्त्यं। याथाकथं। संपादिन्यर्थे। कर्णवेष्टकाभ्यां संपन्नं कार्णवेष्टकिकं॥ चतुर्थ्यंतेभ्यः संतापादिभ्यः प्रभवतीत्यर्थे। संतापाय प्रभवति सांतापिकः। सांग्रामिकः॥ योगात् ठञ् यतौ। यौगिकः। योग्यः॥ उकञ् कर्मणः। कार्मुकं॥ प्रथमांतात् समयात् प्राप्तिमति। समयः प्राप्तोऽस्य सामयिकः। ऋतुः प्राप्तोऽस्य आर्तवं॥ चूडादिभ्यः प्रयोजनवति अण्। चूडा प्रयोजनमस्य चौडं। श्राद्धं॥ सप्तम्यां समापनात् छः। व्याकरणसमापनीयं। न्यायसमापनीयः। मीमांससमापनीयः॥ इति उड् समाप्तः॥ तृतीयांतात् षष्ठ्यंतात् सप्तम्यंताच्च वतिः॥ ब्राह्मणेन तुल्यं ब्राह्मणवत्। अधीते। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवत् मैत्रस्य कर्म॥ द्वितीयांतात् अर्हकर्मणि। विधिमर्हति विधिवत् पूज्यते॥ षष्ठ्यंतेभ्यः सर्वेभ्यः भावे त्वतलौ॥ गोर्भावः गोत्वं। गोता वा। त्वांतं क्लीबं। तलंतं स्त्रियां। स्त्रीपुंसाभ्यां त्वः तलन् नञ्स्नञौ च। स्त्रीत्वं। स्त्रीता। स्त्रैणं। पुंस्त्वं। पुंस्ता। पुंस्नं॥ पृथ्वादिभ्यः इमनिच् अण् च। इष्टनि परे इमेयसोश्च। पृथोर्भावः प्रथिमा। पार्थवं। म्रदिमा। मार्दवं॥ वर्णवाचकात् दृढादिभ्यश्च ष्यञ् इमनिच्च॥ शौक्ल्यं। शुक्लिमा। दार्ढ्यं। द्रढिमा॥ अथ भावकर्मणि च ब्राह्मणादिभ्यः गुणवचनेभ्यश्च ष्यञ्। जडस्य कर्म भावो वा जाड्यं॥ मौढ्यं। ब्राह्मण्यं। काव्यं। अर्हतो कर्म भावो वा आर्हत्यं॥ चतुर्वर्णादिभ्यः स्वार्थे ष्यञ्। चत्वारो वर्णाः चातुर्वर्ण्यं॥ चातुराश्रम्यं। त्रैस्वर्यं। षाड्गुण्यं। सैन्यं। सांनिध्यं। औपम्यं। सामीप्यं। त्रैलोक्यं। चातुर्वेद्य इत्यादि॥ स्तेनशब्दात् यत् ष्यञ् च॥ स्तेनस्य भावः कर्म वा स्तेयं स्तैन्यं। सखिशब्दात् यः॥ सख्यं॥ दूतात् वणिजश्च यः॥ दूत्यं। वाणिज्यं॥ ज्ञातिकप्योर्ढक्॥

आग्नेयं। कापेयं॥ पुरोहितादिभ्यः षष्ठ्यंतात् यक्। पौरोहित्यं। सैनापत्यं॥ राजन् शब्दात् रा
राज्यं॥ उष्ट्रादिभ्यो वयोवाचकात् प्राणभृज्जातिभ्य अञ्। औष्ट्रं। औन्नेत्रं। कौमारं।
कैशोरं। आश्वं। औष्ट्रं॥ हायनांतात् युवादिभ्यश्च अण्। द्वैहायनं। त्रैहायनं। यौवनं। स्था
विरं। श्रौत्रं॥ लघुपूर्वकात् इगंतात् अण्। शौचं। मौनं॥ सहायाद्वुञ्ष्यञौ। साहायकं। सा
हाय्यं॥ द्वंद्वसंज्ञावाचकात् छः। अच्छावाकीयं। मित्रावरुणीयं॥ इनिनञ् त्वतलो भावकर्मप्रत्य
याश्च समासाः॥ षष्ठ्यंतात् धान्यवाचकात् उत्पत्त्यधिकरणक्षेत्रार्थे खञ्। मुद्गानां भवनं
क्षेत्रं मौद्गीनं॥ शालीव्रीहिभ्यां ढक्। शालेयं। व्रैहेयं॥ षष्टिकयवयवकेभ्यो यत्। षष्टिक्यं। य
व्यं। यवक्यं॥ माषतिलोमाभंगाणुभ्यो यत् खञौ। माष्यं। माषीणं। तिल्यं। तैलीनं। उम्यं।
औमीनं। भंग्यं। भांगीनं। अणव्यं। आणवीनं॥ तृतीयांतात् सर्वचर्मणः कृते खखञौ। स
र्वचर्मणा कृतः सर्वचर्मीणः। सार्वचर्मीणः॥ द्वितीयांतेभ्यः सर्वपूर्वकेभ्यः पथ्यंगपात्रप
त्रकर्मांतेभ्यः खः स्यात्। सर्वपथं व्याप्नोति सर्वपथीनः। सर्वांगीणः। सर्वपात्री
णः। सर्वपत्रीणः। सर्वकर्मीणः॥ आप्रपदात् प्राप्नोतीत्यर्थे। आप्रपदं प्राप्नोति आप्रपदीनः॥ ७८

अनुपदात् बद्धे। अनुपदीनः॥ सर्वान्नात् भक्षयतीत्यर्थे। सर्वान्नीनः॥ अयानयात् नेये। अया
नयीनः॥ पुत्रपौत्रात् परंपरात् परोवराच्च अनुभवतीत्यर्थे। पुत्रपौत्रीणः। परंपरीणः। परोवरी
णः॥ अनुकामादत्यंतादवारपारादिभ्यो गामिनि। अनुकामं गामी अनुकामी
नः। अत्यंतीनः। अवारपारीणः। अवारीणः। पारीणः। पारावारीणः॥ अनुपूर्वाक्षो: अलं
गच्छतीत्यर्थे। अनुगवीनः॥ प्रथमांतात् गोष्ठाद्भूतपूर्वे खञ्। गोष्ठीनः॥ षष्ठ्यंतात् श्वादेकाह
गमे। आश्वीनः॥ शालाशब्दात् प्रवेशनमर्हतीत्यर्थे शालीनः॥ कूपशब्दात् पतनमर्हतीत्यर्थे।
कूपपतनं अर्हति कौपीनं॥ तृतीयांतात् व्रातशब्दात् जीवतीत्यर्थे। व्रातीनः॥ सप्तशब्दादवा
प्ते सख्यमित्यर्थे। साप्तपदीनं॥ षष्ठ्यंतेभ्यः पील्वादिभ्यः पाके कुणप्। कर्णादिभ्यश्च मूले
जाहच्। पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं॥ पक्षात् मूले तिः। पक्षतिः॥ तृतीयां
तात् वित्ते चुंचुप्चणपौ। विद्यया वित्तः विद्याचुंचुः। विद्याचणः॥ षष्ठ्यंतेभ्यः अलाबूमातिल
भंगेभ्यः रजसि कटच्। अलाबूनां रजः अलाबूकटं। तिलकटं॥ संघातेऽर्थे कटच्। अविक
टः॥ विस्तारेऽर्थे पटच्। अविपटः॥ गोयुगः द्वित्वे। द्वौ उष्ट्रौ उष्ट्रगोयुगं॥ षड्गवः षट्त्वे। अश्व

षट्गवं॥ भवने क्षेत्रे शाकट शाकिनौ॥ इक्षुशाकटं। इक्षुशाकिनं॥ प्रथमांतेभ्यः तारकादिभ्यः अस्यसंजातं इत्यर्थे इतच्॥ तारकासंजाता अस्यतारकितं नभः। शंकितः॥ प्रथमांतात्परिमाणमस्येत्यर्थे द्वयसच् मात्रच् दघ्नच्॥ ऊरुद्वयसं। ऊरुमात्रं। ऊरुदघ्नं। प्रमाणात्परिमाणात्संख्यायाश्चसंशयेमात्रच्॥ शममात्रं। प्रस्थमात्रं। पंचमात्राः॥ प्रथमांतेभ्यः यत्तदेतेभ्यः परिमाणेनिवतुप्॥ यत्परिमाणमस्य यावान् तावान्। एतावान्॥ किमिदंभ्यांवतुप् तस्यचघः॥ कियान्। इयान्। संख्यावाचकात् अवयवोऽस्येत्यर्थेतयप्॥ पंचअवयवा अस्यपंचतयं। त्रिद्विभ्यां अयच्तयपौ॥ त्रयं। त्रितयं। द्वयं। द्वितयं॥ उभशब्दादयच्। उभयं॥ दशांतेभ्यः अधिकं अस्मिन्शते सहस्रे वेत्यर्थेडः॥ एकादश अधिका अस्मिन्नेकादशं शतं। एकादशंसहस्रं॥ षष्ठ्यंतात्पूरणेडट्॥ एकादशानां पूरणः एकादशः। नकारांतादसंख्यादेः पूरणेऽर्थेमट्॥ पंचमः॥ कतिकतिपयषट्चतुर्भ्यः परस्य डथौथुक्॥ षण्णांपूरणः षष्ठः। कतिथः। कतिपयथः। चतुर्थः॥ पूगगणसंघबहुभ्यः डटः तिथुक्॥ पूगतिथः। गणतिथः। संघतिथः। बहुतिथः॥ द्वित्रिभ्यांतीयः॥ द्वितीयः। तृतीयः॥

विंशत्यादिभ्यः तमट्डटौ। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। प्रथमांतात् अधिकरणयोः सूक्तसाम्नोः छः। अछावाकीयं। वारवंतीयं। सप्तम्यंतात्पथः कुशलेवुन्। पथिकुशलः पथिकः। आकर्षादिभ्यः कन्। आकर्षकः। हिरण्यधनाभ्यां इच्छायां हिरण्येकामो हिरण्यकः। धनकः। स्वांगवाचिभ्यः प्रसितोंकेशेषुप्रसितः केशकः। सस्यशब्दात् तृतीयांतात् परिजाते सस्येनपरिजातः सस्यकः अंशात् हारिणि अंशकः। द्वितीयांतोउष्णशीताभ्यां कारिणि। उष्णकः। शीतकः तृतीयांतात्पार्श्वादन्विछतीत्यर्थे। पार्श्वकः। दंडाजिनाय:शूलाभ्यां ठञ्ठकौ। अयःशूलेनान्विछतिआयःशूलिकः। दांडाजिनकः। प्रथमांतादेषांग्रामणीरित्यर्थे देवदत्तोमुख्यो येषांते देवदत्तकाः। त्वत्काः। मत्काः। प्रथमांतश्रृंखलाथाः बंधनं करभस्येत्यर्थे। श्रृंखलकः करभः। रोगद्वितीयकः विषपुष्पकः॥ प्रथमांतात् प्रायेणान्नवति। गुडापूपाः प्रायेणान्नंअस्यांगुडापूपिका। इनिर्वटकेभ्यः। वटकिनी। अनुकुल्माषात् कौल्माषी। प्रथमांतश्राद्धादनेनभुक्तमित्यर्थेइनिठनौ। श्राद्धी श्राद्धिकः। पूर्वात्पूर्वतात्

कृतमनेनेत्यर्थे इनिः। पूर्वीकृतपूर्वी॥ इष्टादिभ्यः अनेनेत्यर्थे। इष्टी। अधीती॥ साक्षात् द्रष्टरि इनिः। साक्षी॥ अथ प्रथमांतात् अस्य अस्ति अस्मिन् वेत्यर्थयोर्मतुप्। गावोस्यास्मिन्वा संतिगोमान्॥ रसरूपवर्णगंधस्पर्शशब्दस्नेहेभ्यो मतुबेव। नान्यः। रसोस्यास्तीति रसवान्। रूपवान्। वर्णवान्। गंधवान्। स्पर्शवान् इत्यादि॥ शुक्लादिगुणवाचकेभ्यस्तु मतुपो लुक्। शुक्लोस्यास्तीति शुक्लः। कृष्णः। नीलः॥ मकाराकारोपांत्योयस्य तस्मात् परस्य मकाराकारांतात् झयंताच्च परस्य मतुपो मकारस्य वकारः। किंवान्। ज्ञानवान्। लक्ष्मीवान्। यशस्वान्। उदन्वान्। राजन्वान्॥ आकारांतात् प्राण्यंगात् लच् मतुपौ। चूडालः। चूडावान्॥ सिध्मादेर्मतुप् लचौ। सिध्मवान्। सिध्मलः॥ वातादीनां ऊकारः ततः लच्। वातूलः। दंतूलः॥ कामवति बलवति चार्थे अंसवत्साभ्यां लच्। वत्सलः। अंसलः॥ फेनादिल लच् मतुपः। फेनिलः। फेनलः। फेनवान्॥ लोमादिभ्यः शमतुपौ। लोमशः। लोमवान्॥ पामादिभ्यः नमतुपौ। पामनः। पामवान्॥ पिच्छादिभ्य इलच् मतुपौ। पिच्छिलः। पिच्छवान्॥ णः प्रज्ञादिभ्यः। प्राज्ञः। श्राद्धः। आर्चः। वार्तः॥ सहस्तपोभ्यां इन् विनौ अण् च। साहस्री।

तपस्वी। तापसः॥ ज्योत्स्नादिभ्यः अण्। ज्यौत्स्नः। तामिस्रः॥ शर्करासिकताभ्यां लुप् इलच् अण् मतुप् च। सिकता। सिकतिलः। सैकतः। सिकतावान्। एवं शर्करेत्यादि॥ दंतात् उन्नता अस्यास्मिन्वेत्यर्थे उरच्। दंतुरः॥ केशात् मत्वर्थे वः इनिः ठन् मतुप् च। केशवः। केशी। केशिकः। केशवान्॥ रज आदिभ्यः वलच्। रजस्वला। कृषीवलः। आसुतीवलः। पर्षद्वलः॥ अथ मत्वर्थे विशेषशब्दाः॥ ज्योत्स्ना। तमिस्रं। उर्जस्वी। ऊर्जस्वान्। गोमी। मलीमसः। मलिनः। शृंगी। ऊर्जस्वलः॥ अकारांतात् व्रीह्यादिभ्यश्च इनिठनौ। दंडोस्यास्मिन्वास्तीति दंडी। दंडिकः। व्रीही। व्रीहिकः॥ मायी। मायिकः॥ शिखामालासंज्ञादिभ्य इनिः। शिखी। माली। संज्ञी॥ यवखेदादिभ्यः ठन्। यविकः। खेदिकः॥ तुंदादिभ्य इनिठनिलचः। तुंदी। तुंदिकः। तुंदवान्॥ स्वांगवाचकाद्विवृद्धिमति॥ कर्णी। कर्णिकः। कर्णिलः॥ रूपात् आहतं प्रशस्तं वास्येत्यर्थे यप्॥ आहतं प्रशस्तं वा रूपमस्यास्तीति रूप्यः॥ अथ मत्वर्थे असंतात् मायादेश्च विन् मतुपौ॥ यशस्वी। यशस्वान्। मायावी। मायावान्॥ द्वितीयांत शीतोष्णतृप्रेभ्यः न सहत इत्यर्थे आलुच्। शीतालुः। उष्णालुः। तृप्रालुः॥ हिमादेलुः। हिमेलुः॥ ऊर्णो बलात्।

बल्लूलः।मत्वर्थेअच् अर्शआदिभ्यः।अर्शोस्यास्तीतिअर्शसः।।इतिमत्वर्थ्याः समाप्ताः।।

अथ अद्यादिरूपेभ्यः सर्वनामभ्यः किंबहुभ्यांच प्रत्ययाः पंचम्यर्थे। तसिः। सर्वस्मादिति
सर्वतः।बहुतः।कुतः।सप्तम्यर्थेत्रल्॥सर्वस्मिन्निति सर्वत्र। कुत्र। बहुत्र। सप्तम्यर्थे इदं
शब्दात् हः। इह। अत् किमः। क। क्वचिदन्यविभक्त्यर्थेपि। तत्रभवान्। ततोभवान्। ततो
भवंतं। काले तद् यद् किं एक सर्वान्येभ्योदा सप्तम्यर्थे। तस्मिन्काले तदा। यदा। कदा।
एकदा। सर्वदा।अन्यदाः।इदमः कालेर्हिल् दानींच। एतर्हि। इदानीं। तदोदानी। तदानीं।
अनद्यतने किंयत्तद्भ्यः दार्हिलौ। कदा। कर्हि।यदा।यर्हि। तदा। तर्हि। प्रकारेर्थे तदादिभ्यः
थाल्। तेनप्रकारेण तथा। यथा। कथा। एकथा। सर्वथा।अन्यथा। किमिदंभ्यां थमुः।केन
प्रकारेण कथं।अनेनप्रकारेण इत्थं। अथ प्रथमापंचमीसप्तम्यर्थे दिशिरूढेभ्यः दिग्देशका
लवाचकेभ्यः अस्तातिः पूर्वः पूर्वस्मात् पूर्वस्मिन्निति।पुरस्तात्। अवराधरपूर्वेभ्यः अ
सिः अस्तातिश्च।अवः।अवस्तात्।अवरस्तात्।अधस्तात्।पुरः।पुरस्तात्। अंचधा
त्वंतात्लुक्। प्राच्यां प्राच्याः प्राचीवा। प्राचिप्राचः प्राक्वा प्राक्।उदक्। आतिः उत्तराधरद

क्षिणेभ्यः।उत्तरात्।अधरात्।दक्षिणात्॥उत्तरादिभ्यः एनप्वा सामीप्ये पंच-
मीं विना ॥उत्तरेण।अधरेण।दक्षिणेन पर्वतं। संख्यायाः प्रकारेधा चतुःप्र
कारः। चतुर्धा पंचधा द्वित्रिभ्यां धमुञ्वा। द्वैधं द्विधा। त्रैधं त्रेधा। एताभ्यां एधा
च। द्वेधा त्रेधा। कुत्सिते पाशप्। कुत्सितोभिषक् भिषक्पाशः। तमप् इष्ठ
न् च अतिशायने। अतिशयेन लघुः लघुतमः लघिष्ठः। द्वयोरेकस्यातिशा
ये तरबीयसुनौ॥अयं अनयोर्लघुः लघुतरः लघीयान्। रूपप् प्रशंसायां॥
प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपं। ईषन्न्यूने कल्पप् देश्य दे
शीयरः। ईषदूनो विद्वान् विद्वत्कल्पः। विद्वद्देश्यः। विद्वद्देशीयः। न्यूनं पचति
पचतिकल्पं। सुपः पूर्वं बहुच् ईषन्न्यूने। ईषदूनः पटुः बहुपटुः। प्रकारेजातीय
र्। पटुप्रकारः पटुजातीयः ॥अथ कप्रत्ययः॥ अव्ययस्य सर्वनाम्नश्च टेः
प्राक् अकच्॥अज्ञातार्थे कुत्सिते अनुकंपिते च अज्ञातः कुत्सितः अनुकंपि
तो वाश्वः अश्वकः। सर्वकः विश्वकः अल्पार्थे। अल्पं तैलं तैलकं। ह्रस्वार्थे। ह्र

स्वो वृक्षो वृक्षकः। ह्रस्वत्वेन संज्ञायां। वंशकः वेणुकः। कुट्यादेः ह्रस्वेरः। ह्
स्वा कुटी कुटीरः। शमीरः। शुंडारः। वत्सादिभ्यष्टरच्। ह्रस्वो वत्सः वत्सतरः। उ
क्षतरः अश्वतरः। ऋषभतरः। किंयत्तद्भ्यः द्वयोरेकस्य निर्धारणे डतरच्। अन
योः कः वैष्णवः कतरः यतरः ततरः॥ किमादिभ्यो बहूनां निर्धारणे डतमच्।
कतमः यतमः ततमः। कन् अवक्षेपणे। व्याकरणकेन गर्वितः॥ अथ पदलो
पः॥ अनुकंपायां बह्वक्षरात् मनुष्यनाम्नः ठच् घन् इलच् च द्वितीयाक्षरोत्तर
स्यलोपश्च॥ अनुकंपितो देवदत्तो देविकः देवियः देविलः॥ चतुर्थाक्षरादूर्ध्वस्य च लो
पः॥ अनुकंपितो बृहस्पतिदत्तो बृहस्पतिकः॥ कादौ प्रत्यये क्वचिल्लोपः॥ देवदत्तकः
देवकः॥ क्वचित्पूर्वपदस्यापि लोपः॥ दत्तिकः। दत्तियः। दत्तिलः। दत्तकः। क्वचित्प्रत्य
यं विनापि॥ देवदत्तः। दत्तः देवः सत्यभामा। सत्या भामा॥ द्वितीयसंध्यक्षरादेर्लोपः।
अनुकंपितः कहोडः कहिकः। एकाक्षरपूर्वपदादुत्तरस्यलोपः। वागाशीर्दत्तः वा
चिकः। शेवलादीनां तृतीयाक्षरादुत्तरस्यलोपः। अनुकंपितः शेवलदत्तः शेवलिकः। ८०

सुपरिकः। विशालिकः। वरुणिकः। अर्यमिकः॥ अजिनस्योत्तरस्यलोपः। अनुकं
पितो व्याघ्राजिनो व्याघ्रकः। सिंहकः॥ इति लोपप्रकरणं॥ अथ सदृशे प्रतिकृतौ कन्।
अश्वसदृशी प्रतिकृतिः अश्वकः। संज्ञायां च। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः।
मनुष्ये संज्ञायां कन्प्रत्ययस्य लुप्॥ चंचा तृणमयः पुमान्। चंचेव मनुष्यश्चं
चा। जीविकार्थे आपण्ये। कनो लुप्॥ वासुदेवसदृशी प्रतिकृतिः वासुदेवः। शि
वः स्कंदः। अथ सदृशार्थे ढञ् वस्तेः। वस्तिसदृशं वास्तेयं। शिलाया ढढञौ॥ शिले
यं। शैलेयं। यः शाखादिभ्यः॥ शाखेव शाख्यः मुख्यः जघन्यः अग्र्यः शरण्यः॥
अण् शर्करादिभ्यः। शर्करेव शार्करं। पूगवाचकात् स्वार्थे ञ्यः। लौहित ध्वज्यः॥ व्रा
तच्फञ्भ्यां च। कापोतपाक्यः। कौंजायन्यः। व्राध्नायन्यः॥ आयुधजीविपूगवा
चकपर्श्वादिभ्यः अणञौ स्वार्थे॥ पार्शवः यौधेयः। अथ वीप्सायां संख्यादेः पा
दशतांतात् वुन्। द्वौ द्वौ पादौ द्विपादिका। द्विशतिका॥ प्रकारार्थे स्थूलादिभ्यः क
न्॥ स्थूलप्रकारः स्थूलकः अणुकः। चंचत्कः बृहत्कः। क्रियागणन वृत्तौ संख्या

याः कृत्वसुच्। द्विर्भुंक्ते। त्रिर्भुंक्ते। चतुर्भुंक्ते। आसन्नेवर्तमानात्। बहुशब्दा
त् धाकृत्वसुचौ। बहुधा। बहुकृत्वः। प्रथमांतात् प्राचुर्येमयट्। अन्न प्रचुरः अ
न्नमयः॥ देवतांतादेःयत् तदर्थे॥ अग्निदेवतायैइदं अग्निदेवत्यं। पितृदेवत्यं।
पाद्यं अर्घ्यं॥ भागादिभ्यः धेयः। भागधेयं। रूपधेयं। नामधेयं। यावादेः कन्।
याव एव यावकः। मणिकः। कर्मादिभ्योण्। कर्मैव कार्मणं। प्रज्ञ एव प्राज्ञः। बांध
वः। बह्वल्पकारकवाचकात् शस्॥ बहूनि ददाति बहुशः अल्पशः। वीप्सायां सं
ख्यायाः एकवचनाच्च॥ द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। अपूर्व
भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अकृष्णः कृष्णः संपद्यते कृष्णीकरोति। कृष्णीभवति।
कृष्णीस्यात्। सातिः वा कार्त्स्न्ये। च्विविषये। कृत्स्नं शस्त्रं अग्निः संपद्यते अग्निसा
द्भवति। अग्नीभवति। तस्मादधीने साति। राजसाद्भवति। राजसात्संपद्यते राजाधी
नमित्यर्थः। तस्माद्देये अधीने त्रा साती। विप्राधीनं देयं करोति। विप्रत्रा करोति।
विप्रसात् करोति। अथ डाच्। अव्यक्तानुकरणात्। पटपटा करोति। प्रियसुखा
दानुलोम्ये। प्रियाकरोति सुखाकरोति। प्रातिलोम्ये दुःखात्। दुःखाक
रोति॥ ॥इति तद्धितकलापः समाप्तः॥